शब्दावली—स्वर्णम् = सोना, रजतम् = चाँदी, लौहम् = लोहा, चक्रम् = पहिया, स्वर्णकारः = सुनार, लौहकारः = लोहार, चर्मकारः = चमार, कुम्भकारः = कुम्हार, नापितः = नाई, रजकः = धोबी, पादत्राणम् = जूता, घटः = घड़ा, सैनिकः = सिपाही। रक्ष् = रक्षा करना, रच् (रचय) = बनाना, निर्मापि (निर्मापय) = बनाना, कृन्त् = काटना।

नियम ३९—(सप्तमी) संलग्न और चतुर अर्थ वाले शब्दों के साथ सप्तमी होती है। सः पठने संलग्नः, तत्परः, युक्तः, आसक्तः वा अस्ति—वह पढ़ाई में लगा हुआ है। रामः विद्यायां निपुणः अस्ति। कृष्णः शास्त्रे चतुरः दक्षः वा अस्ति।

नियम ४०—(सप्तमी) प्रेम, आसक्ति और आदर सूचक शब्दों और धातुओं के साथ सप्तमी होती है। तस्य मयि स्नेहः अस्ति। स रमायाम् आसक्तः अस्ति। मम गुरौ आदरः अस्ति।

सूचना—अस्मद् शब्द (२६) के पूरे रूप स्मरण करो। कथ् और और भक्ष् धातुओं (६२, ६३) के पाँचों लकारों के रूप स्मरण करो।

उदाहरण वाक्य—स्वर्णकारः स्वर्णेन आभूषणं रचयति। लौहकारः लौहेन पात्राणि निर्मापयति। नापितः केशान् कृन्तति। कुम्भकारः घटं चर्मकारः च पादत्राणं निर्मापयति। सैनिकः नगरं रक्षति। रजकः वस्त्रं धावति। मया सह क्रीड। मह्यं फलं रोचते। मयि शौर्यं वर्तते। सत्यं कथय। अहम् असत्यं न कथयिष्यामि। पथ्यं भोजनं भक्षय। छात्राणां गुरौ आदरः अस्ति।

(क) संस्कृत बनाओ—

सुनार सोने से गहना बनाता है। लोहार लोहे से पहिया बनाता है। नाई बाल बनाता है। कुम्हार घड़ा बनाता है। सुनार चाँदी के गहने बनाता है। सिपाही नगर की रक्षा करता है। तुम मेरे साथ खेलो। मेरी पुस्तक मुझे दो। गुरु का मुझपर स्नेह है। हमारा मित्र काशी में रहता है। हमारे गाँव में विद्यालय है। राम शस्त्रविद्या में निपुण है। कृष्ण गान में चतुर है। मैं खेल में लगा हुआ हूँ।

(ख) संस्कृत में उत्तर दो—

स्वर्णकारः किं रचयति ? नापितः किं कृन्तति ? रजकः किं धावति ? कुम्भकारः किं करोति ? चर्मकारः किं निर्मापयति ? कस्य गुरौ आदरः अस्ति ? कः गाने चतुरः अस्ति ? त्वं किं भक्षयसि ? किं कथय ? अहं किं कथयिष्यामि ?

(ग) रिक्त स्थानों को भरो—(कथ्, भक्ष् धातु)

अहं सत्यं······ ।
ते असत्यं न······ ।
वयं कथां······ ।
यूयं भोजनं······ ।
ते पथ्यं······ ।
अजीर्णे भोजनं न ··· ।

(घ) अस्मद् शब्द के पूरे रूप लिखो।

(ङ) कथ् और भक्ष् धातु के लट्, लङ् और विधिलिङ् के रूप लिखो।

———

अभ्यास २०

शब्दावली—गौः = गाय, अश्वः = घोड़ा, वृषभः = बैल, उष्ट्रः = ऊँट, सिंहः = शेर, मृगः = हिरन, वानरः = बन्दर, कुक्कुरः = कुत्ता, मार्जारी = बिल्ली, अजा = बकरी, महिषी = भैंस, रानी, मूषकः = चूहा, गर्दभः = गधा, शृगालः = गीदड़, घासः = घास, तृणम् = घास, भारः = भार, बोझ; वह = ढोना, चर् = चरना, घूमना, क्षिप् = फेंकना।

नियम ४१—(सप्तमी) एक क्रिया के बाद दूसरी क्रिया होने पर पहली क्रिया में सप्तमी होती है। रामे वनं गते भरतः आगतः = राम के वन जाने पर भरत आए। मयि आगते स गृहं गतः।

नियम ४२—(सप्तमी) फेंकना अर्थ की धातुओं के साथ तथा विश्वास और श्रद्धा अर्थ वाली धातुओं और शब्दों के साथ सप्तमी होती है। रामः मृगे बाणं क्षिपति। स धर्मे विश्वसिति। मम धर्मे श्रद्धा अस्ति।

सूचना—एक शब्द के (३४) के तीनों लिंगों में रूप स्मरण करो। अस् धातु (२४) के पाँचों लकारों में रूप स्मरण करो।

उदाहरण वाक्य—गौः दुग्धं ददाति। अश्वः भारं वहति। महिषी, उष्ट्रः वृषभः च घासं चरन्ति। वने सिंहाः, वानराः, मृगाः, शृगालाः च भ्रमन्ति। मार्जारी दुग्धं पिबति। ग्रामे गर्दभाः, अजाः, कुक्कुराः मूषकाः च भवन्ति। मृगे बाणं न क्षिप। स मातरि विश्वसिति। मम गुरौ श्रद्धा अस्ति। त्वयि गृहं गते सः अत्र आगतः। ईश्वरे श्रद्धां कुरु। एकः बालकः एकस्यै बालिकायै एकं फलं यच्छति। एकस्मिन् नगरे मम गृहम् अस्ति। सः अत्र आसीत्, त्वम् आसीः, अहं च आसम्।

(क) संस्कृत बनाओ—

गाय दूध देती है। मेरे घर में भैंस, बकरी, कुत्ता, बिल्ली और चूहे हैं। जंगल में शेर, हिरन, बन्दर और गीदड़ रहते हैं। घोड़े, बैल, ऊँट और गधे बोझ ढोते हैं। गाय, भैंस और बकरी घास खाते हैं। हिरन पर बाण न फेंको। मेरे आने पर वह घर आया। राम के वन जाने पर भरत अयोध्या आये। तुम सत्य पर श्रद्धा करो। वह गुरु पर विश्वास करता है। एक बालिका को एक फल दो। एक गाँव में मैं रहता हूँ। तुम कहाँ थे ? मैं यहाँ ही था।

(ख) संस्कृत में उत्तर दो—

गौः किं ददाति ? वृषभाः किं चरन्ति ? वने के पशवः भवन्ति ? ग्रामे के पशवः भवन्ति ? के पशवः भार वहन्ति ? के पशवः तृणं चरन्ति ? रामे वनं गते कः आगतः ? स धर्मे किं करोति ? कस्मिन् श्रद्धां कुरु ? कस्मिन् विश्वासं कुरु ?

(ग) इन वाक्यों को शुद्ध करो—

एकं बालकं दुग्धं देहि। एकां बालिकां फलं यच्छ। एके वने सिंहः आसीत्। एकां लतायां पुष्पाणि सन्ति। अहम् अत्र आसीत्। वयम् अत्र आसन्। त्वम् अत्र अस्तु। ते तत्र स्यात्।

(घ) एक शब्द के पुंलिग और स्त्रीलिंग में रूप लिखो।

(ङ) अस् धातु के लोट्, लङ्, विधिलिङ् में रूप लिखो।

अभ्यास—२१

शब्दावली— खगः = पक्षी, काकः = कौवा, शुकः = तोता, सारिका = मैना, मयूरः = मोर, बकः = बगुला हंसः — हंस. कोकिलः = कोयल, चटका = चिड़िया, कपोतः = कबूतर, कुक्कुटः = मुर्गा, उलूकः = उल्लू, गृध्रः = गिद्ध, आकाशः = आकाश। उड्डयते — उड़ता है। कीदृशम् = कैसा, ईदृशम् = ऐसा।

नियम ४३—(यण् संधि) इ ई को य्, उ ऊ को व्, ऋ को र्, लृ को ल् होता है, बाद में कोई स्वर हो तो। सवर्ण (वैसा ही) स्वर हो तो नहीं। जैसे—यदि + अपि = यद्यपि। मधु + अरिः = मध्वरिः। पितृ + आ = पित्रा। लृ + आकृतिः = लाकृतिः।

नियम ४४— (अयादि संधि) ए को अय् ओ ो अव्, ऐ को आय्, औ को आव् होता है, बाद में कोई स्वर हो तो। शब्द के अन्तिम ए और ओ के बाद अ होगा तो नहीं। (१) हरे + ए = हरये। जे + अः = जयः। (२) भो+अनम् = भवनम्। (३) नै+अकः = नायकः। (४) पौ+अकः = पावकः।

सूचना—द्वि शब्द (३५) के तीनों लिंगों में रूप स्मरण करो। कृ धातु (५६) के पाँचों लकारों के रूप स्मरण करो।

उदाहरण वाक्य :—वृक्षे काकाः, शुकाः, सारिकाः, कपोताः, गृध्राः च सन्ति। मयूरः नृत्यति। उलूकः रात्रौ वदति। सरोवरे हंसाः बकाः च सन्ति। खगाः चटकाः च आकाशे उड्डयन्ते। द्वौ बालकौ, द्वे बालिके च अत्र सन्ति। द्वाभ्यां छात्राभ्यां द्वे पुस्तके देहि। त्वं कार्यं कुरु। सः कार्यं कुर्यात्। अहं कार्यम् अकरवम्। अहं श्रमं करिष्यामि।

(क) संस्कृत बनाओ —

पक्षी उड़ता है। आकाश में हंस, गिद्ध, बगुले और कौवे उड़ रहे हैं। उल्लू रात में बोलता है। मोर नाचता है। मुर्गा बोलता है। कोयल मधुर बोलती है। तालाब में हंस और बगुले हैं। दो बालकों को दो पुस्तकें दो। दो पेड़ों पर दो चिड़ियाँ हैं। तुम सदा काम करो। वह काम करे। मैं अध्ययन करूँ उसने यह काम किया। तुमने क्या काम किया? मैंने यह काम किया। मैं अब परिश्रम करूँगा। वे अब क्या काम करेंगे?

(ख) संस्कृत में उत्तर दो—

खगाः कुत्र उड्डयन्ते? मयूरः किं करोति? उलूकः कदा वदति? सरोवरे के खगाः सन्ति? वृक्षे के पक्षिणः सन्ति? कोकिलः कीदृशं वदति? कुक्कुटः किं करोति? हंसः कुत्र अस्ति? त्वम् इदानीं किं करिष्यसि? बालकाः किं कुर्वन्ति?

(ग) रिक्त स्थानों को भरो —

आकाशे खगाः...... ।
मयूरः... ।
......बालकाभ्यां......पुस्तके देहि।
......वृक्षयोः......खगौ स्तः।
अहं......अकरवम्।
वयं......करिष्यामः।

(घ) कृ धातु के लट्, लङ्, विधिलिङ् के रूप लिखो।

(ङ) **सन्धि करो**—प्रति+एकः। अनु+अयः। मातृ+आ। गुरो+ए। शे+अनम्। गै+अकः। द्वौ+इमौ।

(च) **सन्धि-विच्छेद करो**—यद्यपि। अन्वयः। मात्रे। लाकृतिः। शयनम्। नयनम्। पवनः। पावकः। गायकः। द्वाविमौ।

अभ्यास—२२

शब्दावली—जलम् = जल, नीरम् = जल, सरोवरः = तालाब, तडागः = तालाब, समुद्रः = समुद्र नदी = नदी मत्स्यः = मछली, दर्दुरः = मेढक, कच्छपः = कछुआ, कूपः = कुआँ, मकरः = मगर, धीवरः = धीवर, तरङ्गः = लहर, कमलम् = कमल, विकस् = खिलना, व्यापादय = मारना, सेव् = सेवा करना, लभ् = पाना, उत्तिष्ठ् = उठना।

नियम ४५—(गुण संधि) अ या आ के बाद (१) इ या ई होगा तो दोनों को ए, (२) उ या ऊ होगा तो दोनों को ओ, (३) ऋ होगा तो अर्, (४) ऌ होगा तो अल् होगा। जैसे—गण + ईशः = गणेशः। पर + उपकारः = परोपकारः। महा + ऋषिः = महर्षिः। तव + ऌकारः = तवल्कारः।

नियम ४६—(वृद्धि संधि) अ आ के बाद (१) ए या ऐ होगा तो दोनों को ऐ, (२) ओ और औ होगा तो दोनों को औ। जैसे—अत्र + एव = अत्रैव। महा + ओषधिः = महौषधिः।

सूचना—त्रि शब्द (३६) के तीनों लिंगों के रूप स्मरण करो। सेव् और लभ् धातुओं (१०,१६) के आत्मनेपद लट् के रूप स्मरण करो।

उदाहरण वाक्य—जले कमलानि विकसन्ति। सरोवरे मत्स्याः दर्दुराः च सन्ति। समुद्रे मकराः कच्छपाः च तरन्ति। धीवरः मत्स्यान् व्यापादयति। कूपे मधुरं नीरम् अस्ति। अत्र त्रयः छात्राः, तिस्रः बालिकाः त्रीणि पुस्तकानि च सन्ति। त्रिभ्यः बालकेभ्यः, तिसृभ्यः बालिकाभ्यः च त्रीणि फलानि देहि। त्रयाणां छात्राणाम् इमानि त्रीणि पुस्तकानि सन्ति। शिष्याः गुरुं सेवन्ते, विद्यां च लभन्ते। वयं गुरुं सेवामहे।

(क) संस्कृत बनाओ—

तालाब में कमल खिल रहे हैं। सरोवर में मछलियाँ और मेढक हैं। नदी में मछलियाँ और कछुए तैर रहे हैं। कुएँ में मीठा पानी है। समुद्र में मगर और कछुए हैं। धीवर मछली मारते हैं। समुद्र में तरंगें उठ रही हैं। तीन बालकों को तीन पुस्तकें दो। यहाँ तीन छात्र, तीन छात्राएँ और तीन फल हैं। तीन बालिकाओं की ये तीन पुस्तकें हैं। शिष्य गुरु की सेवा करता है। वह धन पाता है। वे पिता की सेवा करते हैं। हम माता की सेवा करते हैं। तू धन पाता है। हम फल पाते हैं।

(ख) संस्कृत में उत्तर दो—

जले किं विकसति ? समुद्रे के जलचराः तरन्ति ? सरोवरे के सन्ति ? कूपे कीदृशं जलम् अस्ति ? धीवरः कान् व्यापादयति ? त्वं कं सेवसे ? वयं कं सेवामहे ? ते किं लभन्ते ?

(ग) इन वाक्यों को शुद्ध करो—

त्रयः बालिकाः। तिस्रः शिष्याः। त्रयः पुस्तकानि। त्रिभ्यः बालिकाभ्यः। त्रयाणां बालिकानाम्। त्रयः गृहाणि।

(घ) सेव् और लभ् धातु के आत्मनेपद लट् के रूप लिखो।

(ङ) **सन्धि करो**—महा + ईशः। गज + इन्द्रः। हित + उपदेशः। सप्त + ऋषिः। अद्य + एव। सा + एषा। जल + ओघः।

(च) **सन्धि-विच्छेद करो**—नेति। महेश्वरः। रमेशः। राजर्षिः। सप्तर्षिः। नैतत्। नैवम्। पश्योपरि। गङ्गोदकम्।

अभ्यास—२३

शब्दावली—आम्रम् = आम, दाडिमम् = अनार, द्राक्षा = अंगूर, बदरीफलम् = बेर जम्बूफलम् = जामुन, कदलीफलम् – केला, सेवफलम् = सेव, दृढबीजम् = अमरूद, नारङ्गफलम् = संतरा, जम्बीरम् = नीबू, भक्षय = खाना, वृध् = बढ़ना, मुद् = प्रसन्न होना। वृत् = होना, भाष् = कहना, ईक्ष् = देखना, यत् = यत्न करना।

नियम ४७—(दीर्घ संधि) अ इ उ ऋ के बाद कोई सवर्ण (सदृश) अक्षर हो तो दोनों के स्थान पर उसी का दीर्घ अक्षर हो जाता है। अर्थात् (१) अ या आ + अ या आ = आ। (२) इ या ई + इ या ई = ई। (३) उ या ऊ + उ या ऊ = ऊ। (४) ऋ + ऋ = ॠ। जैसे—विद्या + आलयः = विद्यालयः। गिरि + ईशः = गिरीशः। भानु + उदयः = भानूदयः। होतृ + ऋकारः = होतॄकारः।

सूचना—चतुर् शब्द (३७) के तीनों लिंगों में रूप स्मरण करो। वृध्, मुद् (१७,१८) आदि के रूप सेव् के तुल्य चलेंगे। लोट् के रूप स्मरण करो।

उदाहरण वाक्य—अहं भोजनान्ते फलानि सेवे। मह्यम् आम्रं दाडिमं द्राक्षा बदरीफलं सेवफलं कदलीफलं दृढबीजं च रोचन्ते। जम्बूफलं नारङ्गफलं जम्बीरं च लाभकराणि वर्तन्ते। त्वं धनेन वर्धस्व, ज्ञानाय यतस्व, सुखेन मोदस्व च। ते सुखेन मोदन्ताम्, सत्यं भाषन्ताम्, मोदन्तां च। स शरीरेण वर्धताम्, सुखं च ईक्षताम्। अहं धनेन मोदै, विद्यायै यतै, सत्यं भाषै च। चत्वारः जनाः चत्वारि फलानि भक्षयन्ति। चतस्रः कन्याः चत्वारि पुष्पाणि जिघ्रन्ति।

(क) संस्कृत बनाओ—

यह आम मधुर है। तुम खाने के लिए सेव, अंगूर, संतरा, केला और जामुन लाओ। भोजन के अन्त में सेव, केला, संतरा खाओ। मुझे फल अच्छे लगते हैं (रुच्)। तुम ज्ञान से बढ़ो। वे धन से प्रसन्न हों। तुम सत्य ही कहो (भाष्)। तुम रमा को देखो (ईक्ष्)। वे धन के लिए प्रयत्न करें (यत्)। वे सुख से रहें (वृत्)। मैं यत्न करूँ और और प्रसन्न रहूँ (मुद्)। उपवन में चार बालक, चार बालिकाएँ और चार फल हैं। चार बालकों और चार बालिकाओं को चार फल दो।

(ख) संस्कृत में उत्तर दो—

तुभ्यं कानि फलानि रोचन्ते ? भोजनान्ते कानि फलानि सेवस्व ? कानि फलानि लाभकराणि वर्तन्ते। स कथं वर्धताम् ? त्वं कथं मोदस्व ? त्वं किमर्थं यतस्व ? ते किम् ईक्षन्ते ? चतस्रः कन्याः किं जिघ्रन्ति ? त्वं चतुर्भ्यः बालकेभ्यः किं यच्छसि ?

(ग) रिक्त स्थानों को भरो—(लोट् लकार)

ते सत्यं……(भाष्)।
त्वं विद्यायै……(यत्)।
त्वं धनेन……(मुद्)।
स ज्ञानेन……(वृध्)।
ते गुरुम्……(ईक्ष्)।
अहं मातरं……(सेव्)।

(घ) चतुर् शब्द के पुंलिंग और स्त्रीलिंग के रूप लिखो।

(ङ) वृध्, मुद् और वृत् धातुओं के लोट् के रूप लिखो।

(च) **सन्धि करो**—दया+आनन्दः। महा+आत्मा। शिष्ट+आचारः। श्री+ईशः। नदी+ईशः। गुरु+उपदेशः। भानु+उदयः।

———

अभ्यास २४

शब्दावली—पद्मम् = कमल, कुमुदम् = सफेद कमल, स्थल-पद्मम् = गुलाब, कुसुमम् = फूल, चम्पकः = चम्पा, मालती = चमेली केतकी = केवड़ा, गन्धपुष्पम् = गेंदा, स्तबकः = गुच्छा, मल्लिका = बेला। घ्रा (जिघ्र्) = सूँघना, सह् = सहना, याच् = मांगना, वन्द् = वन्दना करना, शिक्ष् = सीखना, रम् = लगना, रमण करना, कम्प् = काँपना, पलाय् = भागना। शुभ् = शोभित होना। वा = अथवा, अद्यत्वे = आजकल, नो चेत् = नहीं तो।

नियम ४८—(पूर्वरूप संधि) पद (सुबन्त या तिङन्त) के अन्तिम ए या ओ के बाद अ हो तो वह हट जाता है। (अ हटा है, इस बात को बताने के लिए ऽ अवग्रह = चिह्न लगा दिया जाता है)। जैसे—

हरे + अव = हरेऽव। सर्वे + अपि = सर्वेऽपि

विष्णो + अव = विष्णोऽव। को + अपि = कोऽपि

सूचना—पञ्चन्, षष्, सप्तन् (३८ से ४०) शब्दों के रूप स्मरण करो। सह् आदि के लङ् आत्मनेपद के रूप स्मरण करो।

उदाहरण वाक्य—उपवने स्थलपद्मस्य चम्पकस्य मालत्याः केतक्याः मल्लिकायाः च पुष्पाणि विकसन्ति। सरोवरे पद्मानि, कुमुदानि च शोभन्ते। स साहित्यपठने अरमत, दुःखम् असहत, गुरुम् अवन्दत, शास्त्रम् अशिक्षत च। स न कमपि अयाचत, न अकम्पत, न च पलायत। वन्दे मातरम्। अद्यत्वे स्थलपद्मस्य महत्त्वम् अस्ति। पठ, नो चेत् गुरुः त्वां दण्डयिष्यति।

सुभाषित—सहसा विदधीत न क्रियाम्—शीघ्रता में कोई काम न करो। साहसे श्रीर्वसति—साहस में लक्ष्मी का निवास है। संघे शक्तिः कलौ युगे—कलियुग में संगठन में ही शक्ति है।

(क) संस्कृत बनाओ--

तालाब में कमल खिले हैं। वह गुलाब सूँघता है। बालिका को चम्पा, चमेली, केवड़ा, वेला और गेंदा के फूल दो। फूलों का गुच्छा बनाओ (रच्)। बगीचे में फूलों के पेड़ हैं। आजकल गुलाब का प्रचलन है। उसने गुरु की सेवा की और उनको प्रणाम किया (वन्द्)। उसने व्याकरण सीखा (शिक्ष्)। उसका मन पढ़ने में लगा। चोर भाग गया (पलाय्)। तुम किसी से कुछ न मांगो। माता को प्रणाम (वन्द्)। पढ़ो, नहीं तो पिता तुम्हें दण्ड देंगे (दण्डय)। आजकल तुम कहाँ रहते हो ? (निवस्)।

(ख) संस्कृत में उत्तर दो—

कां वन्दे ? कः त्वां दण्डयिष्यति ? कः पलायत ? सरोवरे कानि पुष्पाणि विकसन्ति ? उपवने कानि पुष्पाणि शोभन्ते। सहसा किं न कुर्यात् ? श्रीः कुत्र वसति। कलियुगे कुत्र शक्तिः वर्तते। अद्यत्वे कस्य पुष्पस्य महत्त्वम् अस्ति।

(ग) इन वाक्यों को शुद्ध करो—

स दुःखम् असहत्। ते पठने अरमन्। चोरः पलायत्। त्वं कम् अवन्दत् ? अहं धनम् अयाचम्। गुरुं वन्द। पञ्च बालकाः क्रीडति। सप्त बालकानाम् एतानि पुस्तकानि अस्ति।

(घ) पञ्चन्, षष्, सप्तन् शब्दों के रूप लिखो।

(ङ) इन धातुओं के लङ् आत्मनेपद के रूप लिखो—सह्, याच्।

(च) संधि करो—सो + अपि। रामो + अपि। सर्वे + अत्र। के + अत्र। सो + अद्य। राम + अवदत्। सो + अयम्।

अभ्यास २५

शब्दावली—क्षेत्रम् = खेत, अन्नम् = अन्न, शस्यम् = अन्न (खेत में विद्यमान), गोधूमः = गेहूँ, व्रीहिः = धान (चावल), तण्डुलः = चावल (भूसी रहित), यवः = जौ, चणकः = चना, द्विदलम् = दाल, यवः = जौ, मुद्गः = मूँग, आढकी = अरहर, मसूरः = मसूर, माषः = उड़द, सर्षपः = सरसों, तैलम् = तेल, चूर्णम् = आटा, रसवती = रसोई। ह्यः = बीता हुआ कल, श्वः = आने वाला कल। ओदनम् = भात।

नियम ४९—(श्चुत्व संधि) स् या तवर्ग से पहले या बाद में श् या चवर्ग हो तो स् को श् और त वर्ग को च वर्ग होता है। अर्थात्—स् को श्, त् को च्, द् को ज्, न् को ञ्। जैसे—रामस्+च = रामश्च। कस्+चित् = कश्चित्। तत्+च = तच्च। सद्+जनः = सज्जनः। याच्+ना = याच्ञा।

सूचना—अष्टन्, नवन्, दशन् (४१ से ४३) शब्दों के रूप स्मरण करो। सेव् आदि के विधिलिङ् आत्मनेपद के रूप स्मरण करो।

उदाहरण वाक्य—मह्यं गोधूमस्य रोटिका रोचते। क्षेत्रे शस्यं भवति। तण्डुलान् ओदनं पच। यवस्य रोटिकां भक्षय। चणकाः रुचिकराः भवन्ति। मुद्गस्य मसूरस्य आढक्याः माषस्य च द्विदलं खाद। सर्षपस्य तैलं शिरसि मर्दय। रसवत्यां भोजनं पच। गोधूमचूर्णं चणकचूर्णं च भक्षय। अहं ह्यः आगच्छन्, श्वः च गमिष्यामि। अत्र अष्ट छात्राः, नव बालिकाः, दश पुस्तकानि च सन्ति। स गुरुं सेवेत, शास्त्रं शिक्षेत, ज्ञानं लभेत च। त्वं पितरं सेवेथाः, वर्धेथाः मोदेथाः च। अहं मातरं सेवेय, वन्देय, मोदेय च। श्वः कार्यम् अद्य कुर्यात्।

(क) संस्कृत बनाओ—

खेत में अन्न होता है। मुझे चने की रोटी अच्छी लगती है। गेहूँ का आटा लाओ। चावल पकाओ। भोजन में मूँग, मसूर, अरहर और उड़द की दाल खाओ। सरसों का तेल सिर पर लगाओ। रसोई में खाना बनाओ (पच्)। वह कल यहाँ आया था। तू परसों (परश्वः) घर जाएगा। कल का काम आज ही कर लो। यहाँ आठ पुस्तकें, नौ छात्राएँ और दस छात्र हैं। तू गुरु की सेवा कर। मैं माता की वन्दना करूँ। वह व्यायाम सीखे।

(ख) संस्कृत में उत्तर दो—

तुभ्यं कस्य रोटिका रोचते? भोजने कस्य द्विदलं भक्षय? के रुचिकराः भवन्ति? रसवत्यां किं कुरु? सर्षपस्य तैलं किं कुरु? त्वं कदा आगच्छः? स कदा गमिष्यति? त्वं कं वन्देथाः? श्वः कार्यं कदा कुर्यात्? अहं कं सेवेय? सः किं लभेत?

(ग) रिक्त स्थानों को भरो—(विधिलिङ्)

अहं गुरुं……(वन्द्)।
त्वं शास्त्रं……(शिक्ष्)।
वयं धनं……(लभ्)।
यूयं मातरं……(सेव्)।
ते धनेन ……(मुद्)।
त्वं कमपि न……(याच्)।

(घ) अष्टन् और दशन् शब्दों के रूप लिखो।

(ङ) इन धातुओं के विधिलिङ् आत्मनेपद के रूप लिखो—
सेव्, लभ्, याच्, भाष्।

(च) संधि करो—सत्+चित्। सत्+चरित्रः। गुरुस्+च। रामस्+च। कस्+चित्। उद्+ज्वलः। याच्+ना।

अभ्यास २६

शब्दावली—पाचकः = रसोइया, मोदकः = लड्डू, अपूपः = पूआ, रोटिका = रोटी, शाकः = साग, शष्कुली = पूरी, भक्तम् = भात, सूपः = दाल, शर्करा = शक्कर, सिता = चीनी, पायसम् = खीर, मिष्टान्नम् = मिठाई, पक्वान्नम् = पकवान, लवणान्नम् = नमकीन, नवनीतम् = मक्खन, लप्सिका = हलुआ, घृतम् = घी, तक्रम् = मट्ठा, सूत्रिका = सेंवई।

नियम ५०—(ष्टुत्व संधि) स् या त वर्ग से पहले या बाद में ष् या टवर्ग कोई भी हो तो स् को ष् और त वर्ग को ट वर्ग होता है। अर्थात् स् को ष्, त् को ट्, द् को ड् और न् को ण्। जैसे—रामस् + षष्ठः—रामष्षष्ठः। इष् + तः—इष्टः। उद् + डीनः—उड्डीनः। विष् + नुः—विष्णुः।

सूचना—विंशतिः (२०) से शतम् (१००) तक की संख्याएं स्मरण करो। सेव् आदि के लृट् आत्मनेपद के रूप स्मरण करो। कुछ में इष्यते वाले रूप लगते हैं और कुछ में स्यते आदि। जैसे—सेविष्यते, मोदिष्यते, याचिष्यते, वर्धिष्यते, ईक्षिष्यते, कूर्दिष्यते। लप्स्यते, रंस्यते।

उदाहरण वाक्य—पाचकः रसवत्यां रोटिकां शष्कुलीम् अपूपान् पायसं च पचति। मह्यं मिष्टान्नं पक्वान्नं लप्सिका सूत्रिका च रोचन्ते। तुभ्यं लवणान्नं नवनीतं तक्रं च रोचन्ते। दशम्यां कक्षायां त्रिंशत्, नवम्यां चत्वारिंशत्, अष्टम्यां षष्टिः, पञ्चम्यां च नवतिः छात्राः सन्ति। त्वं पितरं सेविष्यसे, मोदिष्यसे, वर्धिष्यसे च। स विद्याम् अध्येष्यते, धनं लप्स्यते, सुखेन रंस्यते च। अहं कमपि धनं न याचिष्ये।

(क) संस्कृत बनाओ—

रसोइया पूरी, खीर, पकवान और हलुआ बना रहा है (पच्)। मुझे लड्डू, मिठाई, नमकीन और हलुआ अच्छा लगता है (रुच्)। तुम सेंवई, मक्खन, घी और चीनी खाओ। तुम दाल में घी, दूध में चीनी और मट्ठे में नमक डालो (क्षिप्)। दसवीं कक्षा में पचास, आठवीं में साठ, सातवीं में सत्तर, छठीं में अस्सी और पाँचवीं में नब्बे छात्र हैं। जो खेलेगा, कूदेगा, पढ़ेगा, वह धन पाएगा, बढ़ेगा, प्रसन्न रहेगा (मुद्) और सुख से आनन्दित होगा (रम्)। वह किसी से धन नहीं माँगेगा।

(ख) संस्कृत में उत्तर दो—

तुभ्यं किं मिष्टान्नं रोचते? पाचकः किं पचति? दुग्धे किं क्षिप? किं तुभ्यं तक्रं रोचते? त्वं भोजने प्रतिदिनं किं खादसि? यः अध्येष्यते (पढ़ेगा), स किं लप्स्यते? यः गुरुं सेविष्यते, स किं लप्स्यते? नवम्यां कक्षायां कति छात्राः सन्ति?

(ग) रिक्त स्थानों को भरो—(लृट् लकार)

अहं गुरुं...... (सेव्)।
त्वं धनं...... (लभ्)।
स सुखेन...... (रम्)।
स भवनम्...... (ईम्)।
अहं कमपि न...... (याच्)।
वृक्षे वानरः ...... (कूर्द्)।

(घ) इन धातुओं के लृट् आत्मनेपद के रूप लिखो -
सेव्, मुद् याच्, लभ्, रम्।

(ङ) संधि करो—कृष्+नः। उष्+त्रः। उद्+डयते। दुष्+तः। विष्+नुः। इग्+तिः। तुष्+तिः।

अभ्यास २७

शब्दावली—आपणः=दुकान, आपणिकः=दुकानदार, विपणिः=बाजार, ग्राहकः=लेने वाला, विक्रेता=बेचने वाला, मूल्यम्=मूल्य, मूल्येन=नगद, पण्यम्=बिक्री की वस्तु, क्री=खरीदना, विक्री=बेचना, सहस्रम्=हजार, लक्षम्=लाख, कोटिः=करोड़, अर्बुदम्=अरब, क्रीणाति=खरीदता है विक्रीणीते=बेचता है।

नियम ५१–(जश्त्व संधि) वर्ग के १, २, ३, ४ (अर्थात् पहले, दूसरे, तीसरे और चौथे वर्ण) को अपने वर्ग का तीसरा अक्षर हो जाता है, यदि वह पद (शब्द) का अन्तिम अक्षर हो तो। जैसे—सत्+आचारः=सदाचारः। जगत्+ईशः=जगदीशः। अच्+अन्तः=अजन्तः।

नियम ५२—(जश्त्व संधि) वर्ग के प्रथम, द्वितीय, तृतीय और चतुर्थ वर्ण को अपने वर्ग का तृतीय अक्षर हो जाता है यदि बाद में तृतीय या चतुर्थ वर्ण हो तो। (यह नियम पद के बीच में लगता है)। जैसे—बुध्+धिः=बुद्धिः। दुघ्+धम्=दुग्धम्। लभ्+धः=लब्धः।

सूचना--नी धातु (२१) के दोनों पदों में पाँचों लकारों के रूप स्मरण करो।

उदाहरण वाक्य--विपणौ आपणिकः मूल्येन पण्यानि विक्रीणीते। स आपणात् वस्त्रं क्रीणाति। अहं प्रतिदिनं विपणिं गच्छामि, तत्र च गोधूमं तण्डुलं द्विदलं (दाल) शाकं च क्रीणामि। अहं सदा मूल्येन पण्यं क्रीणामि। धनिकस्य समीपे लक्षं कोटिः च रूप्यकाणि भवन्ति। तीर्थेषु लक्षशः कोटिशः च जनाः नद्यां स्नानं कुर्वन्तिः। अजां ग्रामं नय। स भारम् अत्र आनयत्। भृत्यः भारं नेष्यति नेष्यते वा। पठने समयं नयेत्।

(क) संस्कृत बनाओ--

वह प्रतिदिन बाजार जाता है। दुकानदार नगद सामान बेचता है। जाओ और दुकान से फल लाओ। ग्राहक दुकान से मिठाई खरीदता है। तू बाजार से मिठाई, नमकीन और फल ला। मैं सदा सामान नगद खरीदता हूँ। बाजार से गेहूँ, चावल, दाल, घी और नमक लाओ। उसके पास एक लाख रुपए हैं। तीर्थों पर लाखों लोग गंगा और यमुना में स्नान करते हैं। वह बकरी गाँव में ले जाता हूँ। मैं पुस्तक घर ले जाता हूँ। नौकर बोझा लाया। वह पुस्तकें घर ले जाएगा।

(ख) संस्कृत में उत्तर दो--

विपणौ आपणिकः किं करोति ? अहं प्रतिदिनं कुत्र गच्छामि ? अहं विपणौ किं क्रीणामि ? स आपणात् किं क्रीणाति ? ग्राहकः पण्यं कथं क्रीणाति ? त्वम् आपणात् किं क्रीणासि ? तीर्थेषु कति जनाः स्नानं कुर्वन्ति ? त्वं पुस्तकं कुत्र नयसि ?

(ग) रिक्त स्थानों को भरो--(नी धातु)

सः भारं...... ।
अहं पुस्तकं गृहं...... ।
त्वम् अजां ग्रामं...... ।
अहं भारं...... ।
पठने समयं...... ।
भृत्यः भारं...... ।

(घ) नी धातु के लोट्, विधिलिङ् और लङ् के रूप लिखो।

(ङ) संधि करो--जगत्+ईशः। सुप्+अन्तः। अच्+अन्तः। सत्+आचारः। शुध्+धिः। बुध्+धः। दघ्+धः।

अभ्यास २८

शब्दावली—आभूषणम् = आभूषण, अलंकारः = आभूषण, हारः = मोती की माला, अङ्गुलीयकम् = अंगूठी, कङ्कणम् = कंकण, मेखला = करधनी, कुण्डलम् = कान की बाली, तिलकम् = तिलक, दर्पणः = शीशा, गन्धतैलम् = इत्र, सिन्दूरम् = सिन्दूर, अञ्जनम् = काजल, चूर्णकम् = पाउडर, ओष्ठरञ्जनम् = लिपस्टिक, फेनिलः = साबुन, आभूषय = सजाना, सखि = मित्र ह्र = ले जाना, चुराना, योजय = लगाना।

नियम ५३--(चर्त्वसंधि) वर्ग के प्रथम, द्वितीय, तृतीय और चतुर्थ वर्ण को उसी वर्ग का प्रथम अक्षर हो जाता है, बाद में वर्ग के प्रथम, द्वितीय वर्ण, श ष स कोई हों तो। जैसे—सद् + कारः = सत्कारः। तद्+परः = तत्परः। उद्+साहः = उत्साह।

सूचना- सखि शब्द (३) के पूरे रूप स्मरण करो। ह्र धातु (२२) के दोनों पदों में पाँचों लकारों के रूप स्मरण करो।

उदाहरण वाक्य--नार्यः आभूषणैः स्वशरीरम् आभूषयन्ति। एताः अङ्गुलीषु अङ्गुलीयकम्, कण्ठे हारम्, कर्णयोः कुण्डलम्, हस्तयोः कङ्कणं च धारयन्ति। एताः शिरसि सिन्दूरम्, नत्रेयोः अञ्जनम्, कपोलयोः चूर्णकम् ओष्ठयोः ओष्ठरञ्जने, भाले तिलकं च धारयन्ति। ताः फेनिलेन स्नानं कुर्वन्ति, गन्धतैलं च योजयन्ति। एतासां सौन्दर्यं दर्शनीयं भवति। आभूषणैः शरीरम् अलंकृतं भवति। सः मम सखा अस्ति। सख्या सह गृहं गच्छ। अहं सख्युः पार्श्वे गच्छामि। कस्यचिद् वस्तु न हर। दुर्जनः स्वसख्युः पुस्तकम् अहरत्। सः अजां ग्रामं हरति।

(क) संस्कृत बनाओ—

आभूषणों से शरीर अलंकृत होता है। स्त्रियाँ गले में हार, कान में कुंडल, अंगुलियों में अंगूठी और दोनों हाथों में कंकण पहनती हैं। नारियाँ सिर में सिन्दूर, आँखों में अंजन, माथे पर तिलक, गालों पर पाउडर और ओठों पर लिपस्टिक लगाती हैं। साबुन से स्नान करो और इत्र लगाओ। बालिका दर्पण में मुँह देखती है। स्त्री मेखला पहने। नारियों का सौन्दर्य दर्शनीय होता है। मित्र, मित्र का काम करता है। मित्र के साथ विद्यालय जाओ। मित्र पर विश्वास करो। मित्र को धन दो। किसी की वस्तु न चुराओ। उसने मेरी पुस्तक चुराई। मैंने उसका धन नही चुराया।

(ख) संस्कृत में उत्तर दो—

नारी कण्ठे किं धारयति ? रमा नेत्रयोः किं धारयति ? नार्यः केन स्नानं कुर्वन्ति ? ताः ओष्ठयोः कपोलयोः च किं योजयन्ति ? कासां सौन्दर्यं दर्शनीयं भवति ? आभूषणैः किम् अलंकृतं भवति ? केन सह गृहं गच्छसि ? कः मम पुस्तकम् अहरत् ?

(ग) इन वाक्यों को शुद्ध करो—

स सख्युः सह गृहम् अगच्छत्। सखायं पुस्तकं देहि। सखौ विश्वास कुरु। नार्यः आभूषणानि धारयति। स्त्रीणां सौन्दर्यं दर्शनीयः भवति। अहं सखि पश्यामि। ते मम पुस्तकम् अहरत्।

(घ) सखि शब्द के पूरे रूप लिखो।

(ङ) हृ धातु के दोनों पदों में लोट्, लङ् और लृट् के रूप लिखो।

(च) संधि करो—सद्+पुत्रः। उद्+कृष्टः। सद्+कारः। उद्+पन्नः।

———

अभ्यास २९

शब्दावली—यात्रा = यात्रा, यात्रिकः, यात्रिन् = यात्री, तीर्थम् = तीर्थ, धूमयानम् = रेलगाड़ी, मोटरयानम् = मोटर, विमानम् = विमान, यात्राशुल्कम् = किराया, यात्रापत्रकम् = टिकट, विद्युद्-यानम् = बिजली से चलने वाली गाड़ी, अद् = खाना, आरुह् = चढ़ना, अवतॄ = उतरना कर्तृ = करने वाला, श्रोतृ = सुनने वाला, वक्तृ = वक्ता दातृ = दाता, नेतृ = नेता।

नियम ५४—(अनुस्वार संधि) पद के अन्तिम म् के बाद कोई व्यंजन हो तो म् को अनुस्वार (ं) हो जाता है। बाद में स्वर होगा तो नहीं। जैसे—सत्यम् + वद = सत्यं वद। गृहम् + गच्छ = गृहं गच्छ। पुस्तकम् + पठ = पुस्तकं पठ।

सूचना—कर्तृ शब्द (५) के पूरे रूप स्मरण करो। अद् धातु (२३) के पाँचों लकारों में रूप स्मरण करो।

उदाहरण वाक्य—यात्रिणः धूमयानेन मोटरयानेन च तीर्थानि गच्छन्ति। यात्रिणः यात्राशुल्कं दत्त्वा यात्रापत्रकं च गृहीत्वा धूमयानेन नगराणि गच्छन्ति। केचन विमानेन विदेशान् गच्छन्ति। विद्युद्यानं तीव्रं चलति। ते धूमयानम् आरोहन्ति, यानावतारे च अवतरन्ति। कार्यस्य कर्ता स्वकार्यं करोति। वक्ता भाषणं ददाति, श्रोतारः च शृण्वन्ति (सुनते हैं)। नेता समाजसेवां करोति। दाता निर्धनाय धनं ददाति। दातारः सुखं लभन्ते। स भोजनम् अत्ति। त्वं फलम् अद्धि। अहं रोटिकाम् आदम्। स फलम् एव अत्स्यति। पशुः घासम् अत्ति। वानरः फलम् अद्यात्।

(क) संस्कृत बनाओ—

यात्री किराया देकर और टिकट लेकर रेलगाड़ी से नगर को जाता है। मोटर से प्रयाग जाओ। विमान से विदेश जाओ। बिजली की ट्रेन तेज चलती है। यात्री ट्रेन में चढ़ते हैं और स्टेशन पर उतरते हैं। तुम्हारी यात्रा शुभ हो। कुछ ट्रेन से और कुछ मोटर से तीर्थस्थानों को जाते हैं। स्टेशन पर कुछ लोग ट्रेन में चढ़ते हैं और कुछ उतरते हैं। दाता बालक को धन देता है। वक्ता व्याख्यान देता है। श्रोता भाषण सुनते हैं। धन का हर्ता धन चुराता है। नेता समाज की सेवा करते हैं। वह फल खाता है (अद्)। मैं रोटी खाता हूँ। तू हलुआ खा। वह पूरी खावे। वे रोटी नहीं खायेंगे।

(ख) संस्कृत में उत्तर दो—

के धूमयानेन गच्छन्ति ? यात्रिणः कुत्र अवतरन्ति ? किं यानं तीव्रं चलति ? जनाः विमानेन कुत्र गच्छन्ति ? के व्याख्यानं शृण्वन्ति ? कः भाषणं ददाति ? के समाजसेवां कुर्वन्ति ? के सुखं लभन्ते ? त्वं किम् अत्सि ?

(ग) इन वाक्यों को शुद्ध करो—

ते फलम् अत्ति। अहं रोटिकाम् अत्ति। ते मिष्टान्नम् अद्यात्। स शाकम् अत्स्यन्ति। ते लवणान्नम् आदत्। अहं सूपम् अद्यात्।

(घ) कर्तृ शब्द के पूरे रूप लिखो।

(ङ) अद् धातु के लट्, लोट् लङ् के रूप लिखो।

(च) सन्धि करो—कार्यम्+कुरु। फलम्+खाद। गृहम्+गच्छ। किम्+करोषि। लेखम्+लिखामि। भोजनम्+करोमि।

अभ्यास ३०

शब्दावली—पितृ = पिता, भ्रातृ = भाई, दिनम् = दिन, सप्ताहः = सप्ताह, ऋतुः = ऋतु, वसन्तः = वसन्त ग्रीष्मः = गर्मी, वर्षा = वर्षा, शरद् = शरद्, हेमन्तः = हेमन्त, शिशिरः = शिशिर, आतपः = धूप, हिमम् = बर्फ, कृशः = निर्बल, स्थूलः = मोटा, मधुरम् = मीठा, कटुः = कड़वा, अल्पः = छोटा, महत् = बड़ा, ह्रस्व = छोटा, दीर्घः = बड़ा, लम्बा, हन् = मारना।

नियम ५५—(विसर्ग संधि) विसर्ग (:) के बाद वर्ग का प्रथम, द्वितीय वर्ण या श ष स होगा तो विसर्ग को स् हो जायगा। (बाद में श् या च वर्ग होगा तो उस स् को श् हो जायगा)। जैसे—रामः + च = रामश्च। कः + चित् = कश्चित्। बालः + तिष्ठति = बालस्तिष्ठति।

सूचना—पितृ शब्द (६) के पूरे रूप स्मरण करो। हन् धातु (२५) के पाँचों लकारों के रूप स्मरण करो।

उदाहरण वाक्य—सप्ताहे सप्त दिनानि भवन्ति—सोमवारः, मङ्गलवारः, बुधवारः, बृहस्पतिवारः, शुक्रवारः, शनिवारः, रविवारः च। वर्षे षड् ऋतवः भवन्ति—वसन्तः, ग्रीष्मः, वर्षा, शरद्, हेमन्तः शिशिरः च। ग्रीष्मे आतपः तीव्रः भवति। वर्षासु वृष्टिः भवति, शिशिरे हिमं पतति, वसन्ते कुसुमानि विकसन्ति। पितरं वन्दे। भ्रात्रा सह गृहं गच्छ। तव पितुः किं नाम अस्ति? पितरि श्रद्धां कुरु। रामः शत्रून् हन्ति। त्वं शत्रून् जहि। कृष्णः बाणेन शत्रुं हन्यात्। अहं सज्जनं न हनिष्यामि। ते दुष्टान् अघ्नन्। त्वं पापिनं हन्याः। रामः रावणम् अहन्।

(क) संस्कृत बनाओ—

सप्ताह में सात दिन होते हैं। ये सात दिन हैं—सोमवार, मंगलवार, बुधवार, बृहस्पतिवार, शुक्रवार, शनिवार और रविवार। साल में ६ ऋतुएँ होती हैं--वसन्त, ग्रीष्म, वर्षा, शरद्, हेमन्त और शिशिर। वसन्त ऋतुराज है। वसन्त में फूल खिलते हैं और वृक्षों पर नवीन पत्ते आते हैं। वर्षा में वृष्टि होती है। शिशिर में बर्फ गिरती है। मैं पिता की वन्दना करता हूँ। तुम पिता के साथ घर जाओ। मैं भाई के साथ यहाँ आया। मेरे भाई का नाम श्याम है। पिता पर श्रद्धा करो। राम ने रावण को मारा। कृष्ण शत्रु को मारता है। तुम दुष्ट को मारो। तुम सज्जन को न मारो।

(ख) संस्कृत में उत्तर दो—

सप्ताहे कति दिनानि भवन्ति ? किं च तेषां नामानि ? वर्षे कति ऋतवः भवन्ति, के च ते ? ग्रीष्मे आतपः कीदृशः भवति ? वर्षासु किं भवति ? शिशिरे किं पतति ? वसन्ते कानि विकसन्ति ? कः रावणम् अहन् ? कस्मिन् श्रद्धां कुरु ?

(ग) इन वाक्यों को शुद्ध करो--

सप्ताहे सप्त दिनं भवति। वर्षे षड् ऋतवः अस्ति। रामः रावणम् अध्नन्। तव पितुः कः नाम सन्ति। वसन्ते कुसुमानि विकसति। ग्रीष्मे आतपं तीव्रं भवति। शिशिरे हिमं पतन्ति।

(घ) पितृ शब्द के पूरे रूप लिखो।

(ङ) हन् धातु के लट्, लोट्, लङ् के रूप लिखो।

(च) सन्धि करो—कृष्णः+च। कः+चन। बालः+तरति। बालाः+चलन्ति। कृष्णः+शेते। हरिः+च।

———

अभ्यास ३१

शब्दावली—भगवत् = भगवान्, भवत् = आप, श्रीमत् = श्रीमान्, बुद्धिमत् = बुद्धिमान्, धनवत् = धनवान्। मासः = मास, पक्षः = पक्ष, शुक्लपक्षः = शुक्लपक्ष, कृष्णपक्षः = कृष्णपक्ष, प्रतिपद् = प्रतिपदा, पूर्णिमा, पूर्णमासी = पूर्णिमा, तिथिः = तिथि, पञ्चाङ्गम् = पत्रा। इ = जाना, उद् + इ = उदय होना, अप + इ = दूर हटना, आ + इ = आना।

नियम ५६—(रुत्वसंधि) शब्द के अन्तिम स् को रु (र्) हो जाता है।

सूचना—प्रथमा के एकवचन आदि में इसी र् का विसर्ग रहता है। अ और आ के अतिरिक्त अन्य स्वरों के बाद यह र् रहता है। जैसे—हरिः + अस्ति = हरिरस्ति। गुरुः + अवदत् = गुरुरवदत्। हरेः + एव = हरेरेव। गुरोः + धनम् = गुरोर्धनम्।

नियम ५७—(संख्येय शब्द) एक से दश तक संख्येय (व्यक्ति या वस्तु-बोधक) क्रमवाचक विशेषण ये हैं—प्रथमः (पहला), द्वितीयः (दूसरा), तृतीयः (तीसरा), चतुर्थः (चौथा), पञ्चमः (पाँचवाँ) षष्ठः (छठा), सप्तमः (सातवाँ), अष्टमः (आठवाँ), नवमः (नवाँ), दशमः (दसवाँ) स्त्रीलिंग में प्रथमा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी, अष्टमी, नवमी, दशमी।

सूचना—भगवत् शब्द (७) के पूरे रूप स्मरण करो। इ धातु (२६) के पाँचों लकारों के रूप स्मरण करो।

उदाहरण वाक्य—भगवन्तं भज। अहं भवन्तं पृच्छामि। श्रीमन्तः बुद्धिमन्तः धनवन्तश्च श्रमेण वर्धन्ते। त्वम् अत्र एहि। सूर्यः उदेति। दुर्जनः अपैति। एकस्मिन् मासे त्रिंशत् दिनानि भवन्ति। एकस्मिन् पक्षे पञ्चदश दिनानि भवन्ति। पञ्चाङ्गे तिथिविवरणं भवति। सप्तम्यां कक्षायाम् अशीतिः छात्राः सन्ति।

(क) संस्कृत बनाओ—

भगवान् को स्मरण करो (स्मृ)। आपको नमस्ते (नमः)। मैं श्रीमान् से पूछता हूँ। बुद्धिमान् नेता होते हैं। धनवान् निर्धनों को धन देता है। एक मास में तीस दिन होते हैं। एक पक्ष में १५ तिथियाँ होती हैं। पूर्णिमा के दिन चन्द्रमा पूर्ण होता है। अमावास्या को रात्रि में अंधकार रहता है। आज पंचमी तिथि है। सूर्य उदय होता है। दुर्जन दूर हटता है। वह जाता है (इ)। तू जा (इ)। तू यहाँ आ (आ+इ)। पञ्चांग में तिथियों का विवरण होता है। कक्षा का प्रथम छात्र चौथे से प्रश्न पूछता है। मैं दशम कक्षा में पढ़ता हूँ। आठवीं कक्षा में अस्सी छात्र हैं।

(ख) संस्कृत में उत्तर दो—

त्वं कस्यां कक्षायां पठसि ? दशम्यां कक्षायां कति छात्राः सन्ति ? अद्य का तिथिः अस्ति ? अद्य चैत्रमासस्य पञ्चमी तिथिः (आज चैत्र मास की पंचमी तिथि है)। अमावास्यायां रात्रौ प्रकाशः भवति न वा ? एकस्मिन् मासे कति दिनानि भवन्ति ? एकस्मिन् पक्षे कति तिथयः भवन्ति ?

(ग) रिक्त स्थानों को भरो—

सूर्यः······(उद्+इ)।
अहं गृहम्······(इ)।
दुर्जनः······(अप+इ)।
त्वम् अत्र······(आ+इ)।
···मासे ··दिनानि भवन्ति।
···कक्षायां···छात्राः सन्ति।

(घ) भगवत् और भवत् शब्द के पूरे रूप लिखो।

(ङ) इ धातु के लट्, लोट्, लङ् के रूप लिखो।

(च) संधि करो—गुरुः+अस्ति। मुनेः+धनम्। विष्णोः+एव। शिशुः+अवदत्। भानुः+उदेति। गुरुः+अत्र।

अभ्यास ३२

शब्दावली—गच्छत् = जाता हुआ, पठत् = पढ़ता हुआ, लिखत् = लिखता हुआ, कुर्वत् = करता हुआ। कृषिः = खेती, कृषकः = किसान, भूमिः = जमीन, क्षेत्रम् = खेत, हलम् = हल, उर्वरा = उपजाऊ, ऊषरः = ऊसर, वृषभः = बैल, मृत्तिका = मिट्टी, कृष् = जोतना, खींचना वप् = बोना, ब्रू = कहना, रुह् = चढ़ना, निकलना।

नियम ५८—(**उत्व संधि**) अः को ओ हो जाता है, बाद में अ हो तो। अः + अ = ओऽ! ओ के बाद अ को पूर्वरूप अर्थात् ओ हो जाता है। अ के लिए अवग्रह चिह्न (ऽ) लगा दिया जाता है। जैसे—कः + अपि = कोऽपि। कः + अयम् = कोऽयम्। सः + अपि = सोऽपि।

नियम ५९—(उत्व संधि) अः को ओ हो जाता है, बाद में वर्ग के तृतीय, चतुर्थ, पंचम वर्ण, ह य व र ल कोई हों तो। जैसे—रामः + गच्छति = रामो गच्छति। कृष्णः + जयति = कृष्णो जयति। धर्मः + रक्षति = धर्मो रक्षति। बालः + लिखति = बालो लिखति।

सूचना—गच्छत् शब्द (८) के पूरे रूप स्मरण करो। ब्रू धातु (२७) के पाँचों लकारों के रूप स्मरण करो।

उदाहरण वाक्य—गच्छन्तं सिंहं पश्य। पठते बालकाय फलं यच्छ। मयि लिखति सति पिता आगच्छत्। कार्यं कुर्वतः श्रीवृद्धिः भवति। कृषकः कृषिं करोति। स हलेन भूमिं कर्षति। वृषभाः हलं कर्षन्ति। कृषकः उर्वरायां भूमौ बीजानि वपति। ऊषरायां भूमौ बीजं न रोहति। एषा भूमिः उर्वरा अस्ति। गुरुः ब्रवीति। अहं ब्रवीमि। त्वं ब्रूहि। रामः अब्रवीत्। स ब्रूयात्। इदानीं स वक्ष्यति। स आह। त्वं किम् आत्थ?

(क) संस्कृत बनाओ—

जाते हुए बालक को देखो। पढ़ते हुए शिष्य को यह पुस्तक दो। परिश्रम करते हुए मनुष्य की श्रीवृद्धि होती है। मैं जब पढ़ रहा था, तब गुरु जी आए। लिखते हुए बालक को फल दो। भारतवर्ष कृषि-प्रधान देश है। किसान हल से भूमि जोतता है। बैल हल खींचते हैं। यह भूमि उपजाऊ है। ऊसर भूमि में बीज नहीं निकलते हैं। किसान उपजाऊ भूमि में बीज बोता है। वहाँ बीज ठीक (सम्यक्) उगते हैं। राम कहता है (ब्रू)। मैं गुरु से कहता हूँ। तुम सत्य कहो। उसने कहा कि यहाँ कोई नहीं है। अब वह कहेगा। तुम क्या कहते हो? तुम सत्य कहो।

(ख) संस्कृत में उत्तर दो—

पठते बालकाय किं यच्छसि? मयि लिखति सति कः आगच्छत्? श्रमं कुर्वतः किं भवति? कृषकः हलेन किं करोति? कुत्र बीजानि सम्यक् रोहन्ति? ऊषरायां भूमौ किं न रोहति? कृषकः किं वपति? भारतवर्षः कीदृशः देशः अस्ति?

(ग) इन वाक्यों को शुद्ध करो—

कृषकः बीजानि वपन्ति। अयं भूमिः उर्वरा अस्ति। अयं क्षेत्रम् ऊषरम् अस्ति। त्वं किं ब्रवीति? त्वं किम् आह? त्वं ब्रूयात्। अहम् अब्रवीत्। वयं ब्रूयाम्। ते वक्ष्यति। त्वं ब्रवीतु।

(घ) गच्छत् और पठत् शब्द के पूरे रूप लिखो।

(ङ) ब्रू धातु के लट्, लोट्, लङ् और लृट् के रूप लिखो।

(च) सन्धि करो—सः+अयम्। सः+अगच्छत्। कः+अपि। यतः+धर्मः। ततः+जयः। नृपः+जयति। देवः+गच्छति।

———

अभ्यास ३३

शब्दावली—आत मन् = आत्मा, परमात्मन् = परमात्मा, ब्रह्मन् = ब्रह्मा, अध्वन् = मार्ग, राजन् = राजा, मूर्धन् = मस्तक, सिर। व्यापारः = व्यापार, व्यापारिन् = व्यापारी, वणिज् = बनिया, तुला = तराजू, तोलनम् = तोलना, पण्यम् = सामान, क्रेता = खरीदने वाला, विक्रेता = बेचने वाला, वस्तु = वस्तु, दुह् = दुहना, तोलय = तोलना, क्री = खरीदना।

नियम ६०—(यत्व संधि) अ या आ के बाद रु (र् या विसर्ग) को य् होता है। बाद में कोई स्वर होगा तो य् का लोप ऐच्छिक है। यदि बाद में कोई व्यंजन होगा तो य् का लोप अवश्य होगा अर्थात् विसर्ग का लोप हो जाता है। जैसे—रामः + इच्छति = राम इच्छति। देवाः + गच्छन्ति = देवा गच्छन्ति।

सूचना—आत्मन् शब्द (९) के रूप स्मरण करो। राजन् शब्द में द्वितीया बहुवचन आदि में अ का लोप होकर ये रूप बनेंगे—राज्ञः, राज्ञा, राज्ञे, राज्ञः, राज्ञोः, राज्ञाम्, राज्ञि, राजनि। शेष रूप आत्मन् के तुल्य होंगे। दुह् धातु (२८) के पाँचों लकारों में रूप स्मरण करो।

उदाहरण वाक्य—सर्वस्मिन् आत्मा अस्ति। परमात्मने ब्रह्मणे च नमः। अध्वनि वृक्षः अस्ति। राजानं पश्य। राज्ञः आज्ञां पालय। तव मूर्धनि केशाः सन्ति। व्यापारिणः व्यापारं कुर्वन्ति। वणिजः तुलया पण्यं तोलयन्ति। क्रेतारः विक्रेतुः वस्तूनि क्रीणन्ति। व्यापारे लक्ष्मी वसति। व्यापारे समुन्नतिः देशस्य लक्ष्मीं वर्धयति। क्रयः विक्रयः च व्यापारस्य आधारौ स्तः। रामः गां दुग्धं दोग्धि। श्यामः गाम् अधोक्। यः गां धोक्ष्यति, स दुग्धं प्राप्स्यति। गोपालाः गाः दुहन्ति।

(क) संस्कृत बनाओ—

सबमें आत्मा है। परमात्मा सर्वत्र व्याप्त है। ब्रह्म को नमस्कार। मुझे मार्ग में एक फल मिला (लभ्)। राजा प्रजा की रक्षा करता है। राजा की आज्ञा पालो। तेरे सिर पर क्या है ? मेरे सिर पर बाल हैं। धन के लिए व्यापार करो। व्यापार में लक्ष्मी निवास करती है। व्यापारी व्यापार करते हैं। बनिये तराजू से सामान तोलते हैं। खरीदने वाले विक्रेता से सामान खरीदते हैं। व्यापार में उन्नति राष्ट्र की संपत्ति को बढ़ाती है। खरीदना और बेचना व्यापार का आधार है। कृष्ण गाय का दूध दुहता है। राम ने गाय दुही। जो गाय दुहेंगे, वे दूध प्राप्त करेंगे। ग्वाले गाय दुहते हैं।

(ख) संस्कृत में उत्तर दो—

कस्मिन् आत्मा अस्ति ? परमात्मा कुत्र व्याप्तः अस्ति ? कः प्रजां रक्षति ? तव मूर्धनि किम् अस्ति ? धनार्थं किं कुरु ? व्यापारे किं निवसति ? विक्रेतुः के पण्यानि क्रीणन्ति ? वणिजः तुलया किं तोलयन्ति ? कः गाम् अधोक् ? गोपालाः किं कुर्वन्ति ?

(ग) इन वाक्यों को शुद्ध करो –

सर्वे आत्मा अस्ति। राजा प्रजायाः रक्षति। व्यापारे लक्ष्मीः वसन्ति। रामः गां दुग्धं दुहन्ति। अहं गाम् अदुहम्। ते गां धोक्ष्यति। अहं गां दोहामि। किं त्वं गां दोग्धि ? राजस्य आज्ञां पालय।

(घ) आत्मन् और राजन् शब्द के रूप लिखो।

(ङ) दुह् धातु के लट्, लोट्, लङ् के रूप लिखो।

(च) संधि करो—बालाः + इच्छति। छात्राः + गच्छन्ति। देवाः + आगच्छन्ति। कः + आगतः। बालिकाः + हसन्ति।

———

अभ्यास ३४

शब्दावली—करिन् = हाथी, दण्डिन् = संन्यासी, विद्यार्थिन् = विद्यार्थी, ज्ञानिन् = ज्ञानी, मन्त्रिन् = मंत्री, पक्षिन् = पक्षी, शशिन् = चन्द्रमा, योगिन् = योगी, वाणिज्यम् = वाणिज्य, अभिकर्तृ = एजेन्ट, शुल्कम् = कमीशन, अर्घः = मूल्य, रेट, आयातः = आयात, निर्यातः = बाहर जाना, करः = टैक्स, आयकरः = इन्कम टैक्स, विक्रयकरः = सेल्स टैक्स, विनिमयः = अदल बदल, मूलधनम् = पूँजी, स्वप् = सोना, आदाय = लेकर।

नियम ६१—(सुलोप संधि) सः और एषः के विसर्ग का लोप हो जाता है, बाद में कोई व्यंजन हो तो। जैसे—सः + पठति = स पठति। सः + गच्छति = स गच्छति। एषः + वदति = एष वदति।

सूचना—करिन् शब्द (१०) के रूप स्मरण करो। स्वप् धातु (२९) के पाँचों लकारों के रूप स्मरण करो।

उदाहरण वाक्य—करिणं पश्य। करिणः दन्तं स्पृश। तीर्थे दण्डिनः योगिनः च भ्रमन्ति। अस्यां कक्षायां विंशतिः विद्यार्थिनः सन्ति। ज्ञानिनः शास्त्राणि पठन्ति। मन्त्रिणः मन्त्रणां कुर्वन्ति। आकाशे पक्षिणः उड्डयन्ते। रात्रौ शशी शोभते। वाणिज्यं श्रीवृद्ध्यै भवति। अभिकर्तारः शुल्कम् आदाय पण्यानि क्रीणन्ति, विक्रयं च कुर्वन्ति। सर्वकारः (सरकार) क्रयेविक्रये च करं गृह्णाति (लेती है)। शासनम् आये आयकरम्, विक्रये विक्रयकरं च गृह्णाति। व्यापारे वस्तूनां विनिमयः भवति। मूलधनेन व्यापारः भवति। वाणिज्येन मूलधनं वर्धते। स गृहे स्वपिति। अहं रात्रौ स्वपिमि। त्वम् अत्र न स्वपिहि। स एकहोरां यावत् अस्वपत्। त्वं कदा स्वप्ससि ?

(क) संस्कृत बनाओ—

तीन हाथी जा रहे हैं। हाथी को फल दो। इस कक्षा में तीस विद्यार्थी हैं। यह उस विद्यार्थी की पुस्तक है। गंगातट पर योगी और दण्डी घूम रहे हैं। आकाश में पक्षी उड़ रहे हैं। ज्ञानी पुस्तकें पढ़ते हैं। यहाँ मन्त्री मन्त्रणा कर रहे हैं। शशी की शोभा देखो। एजेन्ट कमीशन लेकर सामान खरीदते हैं और विक्रय करते हैं। वाणिज्य से मूलधन बढ़ता है। सरकार आय पर आयकर लेती है। शासन बिक्री पर सेल्स टैक्स लेता है। व्यापार में वस्तुओं का विनिमय होता है। धन लेकर व्यापार करो। मैं रात में सोता हूँ। तुम कहाँ सोते हो? यहाँ न सोओ। वह एक घंटा सोया। वह कब सोएगा?

(ख) संस्कृत में उत्तर दो—

कस्य दन्तं स्पृश? तीर्थे के भ्रमन्ति? अस्यां कक्षायां कति विद्यार्थिनः सन्ति? सर्वकारः आये किं गृह्णाति? कथं मूलधनं वर्धते? आकाशे के उड्डयन्ते?

(ग) इन वाक्यों को शुद्ध करो—

करिं पश्य। करिणं फलं देहि। मन्त्रिणः मन्त्रणां करोति। ज्ञानी शास्त्रं पठन्ति। व्यापारे विनिमयः भवन्ति। स स्वपति। त्वं स्वप। अहं स्वपामि। स स्वपिष्यति। वयं स्वपामः।

(घ) करिन् और विद्यार्थिन् के पूरे रूप लिखो।

(ङ) स्वप् धातु के लट्, लोट्, लङ् के रूप लिखो।

(च) संधि करो—सः + पठतु। सः + गच्छेत्। सः + लिखति। एषः + हसति। एषः + वदति।

अभ्यास ३५

शब्दावली—मतिः = बुद्धि, श्रुतिः = वेद, स्मृतिः = स्मृति श्रेणिः = कक्षा, प्रीतिः = प्रेम, शान्तिः = शान्ति, प्रकृतिः = प्रकृति, स्वभाव, समितिः = सभा, सूक्तिः = सुभाषित, नियतिः = भाग्य, समृद्धिः = समृद्धि, रात्रिः = रात्रि। न्यायः = न्याय, विधिः = कानून, न्यायाधीशः = न्यायाधीश, न्यायाध्यक्षः = मुंसिफ, प्राड्विवाकः = वकील, वादिन् = वादी, प्रतिवादिन् = प्रतिवादी, अभियोगः = अभियोग, अपराधिन् = अपराधी, न्यायालयः = न्यायालय। रुद् = रोना।

नियम ६२—(कर्मवाच्य) कर्मवाच्य में धातु से यक् (य) लगता है और आत्मनेपद में रूप चलते हैं। कर्मवाच्य में कर्म मुख्य होता है। कर्म के अनुसार क्रिया होगी। कर्ता में तृतीया, कर्म में प्रथमा और क्रिया कर्म के अनुसार होगी। मेरे द्वारा पाठ पढ़ा जाता है—मया पाठः पठ्यते। मया लेखः लिख्यते। मया ग्रामः गम्यते। मया भोजनं खाद्यते। मया पुस्तकानि पठ्यन्ते।

सूचना—मति शब्द (१२) के रूप स्मरण करो। रुद् धातु (३०) के पाँचों लकारों के रूप स्मरण करो।

उदाहरण वाक्य—मतिः बलाद् गुरुतरा। श्रुतिं स्मृतिं च पठ। अहं दशमश्रेण्यां पठामि। जनेषु प्रीतिः शान्तिः समृद्धिः च स्यात्। सूक्तीः स्मर। समित्यां वद। रामः प्रकृत्या सरलः। न्यायालये न्यायाधीशः न्यायं करोति। स वादिनं प्रतिवादिनं च शृणोति। प्राड्विवाकाः पक्षं प्रतिपक्षं च स्थापयन्ति। ते अभियोगस्य समर्थनं खण्डनं वा कुर्वन्ति। न्यायाधीशः अपराधिनं दण्डयति। बालकः रोदिति। त्वं रोदिषि। अहं रोदिमि। त्वं न रुदिहि। रामः अरोदीत्। त्वं न रुदाः। शिशुः रोदिष्यति।

(क) संस्कृत बनाओ—

तुम श्रुति पढ़ो। स्मृतियों में धर्म की व्याख्या है। बल से बुद्धि बढ़कर है। तुम किस श्रेणी में पढ़ते हो? समिति में भाषण दो। सूक्तियाँ स्मरण करो। समृद्धि चाहो। रात्रि में शयन करो। नियति क्या नहीं करती? न्यायाधीश न्याय करता है। वह पक्ष और विपक्ष को सुनता है। वह अपराधी को दण्ड देता है। वादी और प्रतिवादी अपना पक्ष रखते हैं। वकील अभियोग को प्रस्तुत करते हैं। वे अभियोग का खण्डन या समर्थन करते हैं। राम रोता है। तू रोता है। मैं रोता हूँ। बालक रोया। तू न रो। शिशु रोयेगा। वह न रोवे। तू क्यों रो रहा था?

(ख) संस्कृत में उत्तर दो—

बलात् का गुरुतरा? त्वं कस्यां श्रेण्यां पठसि? जनेषु का स्यात्? का: स्मर? कुत्र वद? न्यायाधीशः किं करोति? प्राड्विवाकाः किं कुर्वन्ति? न्यायाधीशः कं दण्डयति?

(ग) रिक्त स्थानों को भरो—

मया······लिख्यते।
अस्माभिः पुस्तकानि······।
मया······गम्यते।
त्वया भोजनं··· ।
मया बालिका····· (दृश्)।
त्वया······स्पृश्यते।

(घ) मति और श्रेणि शब्द के रूप लिखो।

(ङ) रुद् धातु के लट्, लोट्, लङ् के रूप लिखो।

(च) इन धातुओं के कर्मवाच्य लट् प्रथम पुरुष एकवचन के रूप लिखो—पठ्, लिख्, गम्, हस्, दृश्, स्पृश्, रूद्।

अभ्यास ३६

शब्दावली—नदी = नदी, भवती = आप (स्त्री), रजनी = रात्रि, सखी = सखी, पुरी = नगरी, वाणी = वाणी, बुद्धिमती = विदुषी स्त्री, मृगी = हरिणी, सिंही = सिंहनी, गौरी = पार्वती, राज्ञी = रानी। कार्यालयः = कार्यालय, करणिकः = क्लर्क उपस्करः = फर्नीचर, आसन्दिका = कुर्सी, फलकम् = मेज, पत्रसंचयिनी = फाइल, राजाज्ञा = शासनादेश, प्रमाणलेखः = रिकार्ड । आस् = बैठना ।

नियम ६३—(भाववाच्य) अकर्मक धातुओं से भाववाच्य होता है। भाववाच्य में कर्मवाच्य के तुल्य धातु से यक् (य) प्रत्यय होता है। आत्मनेपद में केवल एकवचन में रूप चलते हैं। कर्ता में तृतीया, क्रिया प्रथमपुरुष एकवचन। कर्म नहीं होता है। कुछ धातुओं के रूप ये हैं— लिख्यते, गम्यते क्रियते, ह्रियते, पीयते, गीयते, तीर्यते, पूर्यते, उच्यते, गृह्यते, जीयते, दीयते, चोर्यते, कथ्यते, भक्ष्यते, गण्यते। मया सुप्यते। त्वया हस्यते। किं दीयते, पीयते, उच्यते, कथ्यते।

सूचना—नदी शब्द (१३) के पूरे रूप स्मरण करो। आस् धातु (३१) के पाँचों लकारों के रूप स्मरण करो।

उदाहरण-वाक्य—भवती नद्यां स्नानं कुरु। राज्ञी विदुषीं वदति। बुद्धिमत्याः वाण्यां माधुर्यम् अस्ति। रजन्यां पुर्यां शान्तिः भवति। वने मृग्यः सिंह्यः च भ्रमन्ति। कार्यालये करणिकः आसन्दिकायां सीदति। स फलके पत्रसंचयिनीं स्थापयति। करणिकः राजाज्ञानां प्रमाणलेखानां च संग्रहं करोति। त्वया किम् उच्यते ? तेन किं कथ्यते ? छात्रेण गम्यते, हस्यते, तीर्यते, गीयते च। स अत्र आस्ते। त्वम् आस्व। स आसने आस्त। स आसिष्यते।

(क) संस्कृत बनाओ—

नदी में स्नान करो। रानी की वाणी में माधुर्य है। पुरी में बुद्धिमती विदुषियाँ भी रहती हैं। गौरी पर्वत पर रहती है। वन में मृगी, सिंहनी भी रहती हैं। रात्रि में शयन करो। सखी से पूछो। क्लर्क कार्यालय का कार्य देखता है। कार्यालय में मेज, कुर्सी और फर्नीचर है। क्लर्क फ़ाइल, शासनादेश और रिकार्ड रखता है (स्थापय)। वह बैठता है। वे बैठते हैं। तुम बैठो। वह यहाँ बैठा। वह आसन पर बैठेगा। तेरे द्वारा क्या पढ़ा जाता है ? मेरे द्वारा पत्र पढ़ा जाता है। मेरे द्वारा धन दिया जाता है। तेरे द्वारा लेख लिखा जाता है। तुम क्या कहते हो ? वह क्या कहता है ?

(ख) संस्कृत में उत्तर दो—

तेन किं पठ्यते ? मया किं लिख्यते ? तेन कुत्र गम्यते ? तेन किं गीयते ? त्वया किं दीयते ? रामेण किं पीयते ? करणिकः किं स्थापयति ? कार्यालये के उपस्कराः सन्ति ?

(ग) इन वाक्यों को शुद्ध करो—

मया ग्रामः गम्यन्ते। त्वया कार्यं क्रियन्ते। तैः धनं दीयन्ते। त्वया चित्राणि दृश्यते। मया उच्यन्ते। तेन सुप्यन्ते। करणिकः पत्र व्यवहारं कुर्वन्ति। त्वम् आस्ते। अहम् आस्ते। ते आस्त। त्वम् आसिष्यसि। ते आसीत।

(घ) नदी, भवती और रजनी के पूरे रूप लिखो।

(ङ) आस् धातु के लट्, लोट् और लङ् के रूप लिखो।

(च) इन धातुओं के भाववाच्य प्र० पु० एक० के रूप लिखो—
पठ्, लिख्, स्वप्, कृ, वच्, कथ्, पा, दा, ग्रह्, तॄ, पॄ।

अभ्यास ३७

शब्दावली—धेनुः = गाय, रेणुः = धूल, रज्जुः = रस्सी, यानम् = गाड़ी, रथः = रथ, शकटः = गाड़ी, बैलगाड़ी, मोटरयानम् = मोटर, विमानम् = हवाई जहाज, पोतः = पानी का जहाज, द्विचक्रिका = साइकिल, द्विचक्रकम् = स्कूटर, त्रिचक्रकम् = थ्री ह्वीलर। शी = सोना। वह् = ढोना, नी = ले जाना, प्रापय = पहुँचाना, पाठय = पढ़ाना, कारय = कराना, लेखय = लिखवाना, उत्थापय = उठाना।

नियम ६४—(प्रेरणार्थक णिच् प्रत्यय) प्रेरणा (दूसरे से काम कराना) अर्थ में धातु से णिच् (अय) प्रत्यय होता है। प्रेरणार्थक धातुओं के साथ मूल धातु के कर्ता में तृतीया होती है, कर्म में द्वितीया, क्रिया कर्ता के अनुसार। जैसे —पढ़ना-पढ़ाना, करना-करवाना। शिष्य लेख लिखता है, गुरु शिष्य से लेख लिखवाता है—गुरुः शिष्येण लेखं लेखयति। नृपः भृत्येन भारं वाहयति।

सूचना—धेनु शब्द (१४) के रूप स्मरण करो। शी धातु (३२) के पाँचों लकारों के रूप स्मरण करो।

उदाहरण वाक्य—धेनुं पश्य। धेनोः दुग्धं पिब। धेनवे तृणं यच्छ। रेणुः मूर्ध्नि पतति। रज्जुम् आनय। वृषभाः शकटं वहन्ति। अश्वाः रथं नयन्ति। अद्यत्वे द्विचक्रिका बहु प्रचलति। केचन द्विचक्रकेण, त्रिचक्रकेण, मोटरयानेन वा स्वकार्यालयं गच्छन्ति। यात्रिणः विमानेन पोतेन वा विदेशान् गच्छन्ति। विमानं निर्दिष्टं स्थानं द्रुतं प्रापयति। त्वं भृत्येन कार्यं कारय। गुरुः शिष्यं पाठं पाठयति। मित्रं नगरं प्रापय। रामं वार्तां श्रावय। त्वं भारम् उत्थापय। बालः शेते। बालाः शेरते। त्वं शेष्व। स गृहे अशेत। त्वं कुत्र शयिष्यसे।

(क) संस्कृत बनाओ—

गाय को यहाँ लाओ। गाय का दूध पीओ। गाय को घास दो। सिर पर धूल गिर रही है। रस्सी यहाँ लाओ। बैल और ऊँट गाड़ी ढोते हैं। घोड़े रथ खींचते हैं। साइकिल, स्कूटर या मोटर से घर जाओ। लोग स्कूटर या तिपहिया से अपने आफिस जाते हैं। यात्री विमान से या पानी के जहाज से विदेश जाते हैं। विमान शीघ्र निर्दिष्ट स्थान को पहुँचाते हैं। तुम बोझा उठाओ। कृष्ण से लेख लिखवाओ। नौकर से काम करवाओ। आचार्य शिष्य को पाठ पढ़ाता है। वह मित्र को शहर पहुँचाता है। वह कृष्ण को बात सुनाता है। शिशु सोता है। बालक सोवे। मैं शय्या पर सोया। वे यहाँ सोयेंगे। तुम कहाँ सोओगे?

(ख) संस्कृत में उत्तर दो—

त्वं कस्याः दुग्धं पिब? धेनवे किं यच्छ? अद्यत्वे किं बहु प्रचलति? त्वं कार्यालयं केन यानेन गच्छसि? यात्रिणः विदेशान् कथं गच्छन्ति? रामं किं श्रावय? गुरुः शिष्यं किं पाठयति?

(ग) इन वाक्यों को शुद्ध करो—

धेनुं घासं यच्छ। केचन द्विचक्रकेण कार्यालयं गच्छति। शिष्यं पाठः पाठय। रामाय वार्तां श्रावय। त्वं भारः उत्थापयति। त्वं शेताम्। ते अशेत। अहम् अशेत। के अत्र शयिष्यते?

(घ) धेनु शब्द के रूप लिखो।

(ङ) शी धातु के लट्, लोट्, लङ् के रूप लिखो।

(च) इन धातुओं के प्रेरणार्थक रूप बनाओ - पठ्, लिख् वह्, कृ, श्रु, प्राप्, उत्था।

———

अभ्यास ३८

शब्दावली—वधूः=बहू, तनूः=शरीर, चमूः=सेना, श्वश्रूः=सास, दण्डः=डंडा, वेत्रम्=बेंत, गदा=गदा, परशुः=फरसा, असिः=तलवार, छुरिका=चाकू, कृपाणः=कृपाण, प्रासः=भाला, युद्धम्=युद्ध, प्रहरणम्=शस्त्र, आयुधम्=शस्त्रास्त्र, शस्त्रागारम्=हथियार रखने का स्थान, योधः=योद्धा, सैनिकः=सैनिक, युध्=युद्ध करना, प्र+हृ=प्रहार करना। हु=हवन करना।

नियम ६५—(सन् प्रत्यय) धातु से 'चाहना या इच्छा करना' अर्थ में सन् (स) प्रत्यय होता है, यदि इच्छा करने वाला वही व्यक्ति हो तो। स लगने पर धातु को द्वित्व हो जाता है। धातुरूप भू या सेव् के तुल्य चलेंगे। कुछ सन् वाले रूप ये हैं:—पठ्-पिपठिषति, लिख्-लिलिखिषति, कृ-चिकीर्षति, तॄ-तितीर्षति, ब्रू-विवक्षति, पा-पिपासति, दा-दित्सति, जि-जिगीषति, श्रु-शुश्रूषते, ज्ञा-जिज्ञसते, दृश्-दिदक्षते, लभ्-लिप्सते। रामः कार्यं चिकीर्षति, जलं पिपासति, गुरुं दिदृक्षते च।

सूचना—वधू शब्द (१५) के रूप स्मरण करो। हु धातु (३३) के पाँचों लकारों के रूप स्मरण करो।

उदाहरण वाक्य—वध्वाः तन्वां वस्त्राणि शोभन्ते। सा श्वश्रूं सेवते। चमूषु योधाः सैनिकाश्च भवन्ति। योधाः युद्धेषु युध्यन्ते। ते आयुधानि धारयन्ति। ते असिभिः कृपाणैः प्रासैः परशुभिः च शत्रुषु प्रहारं कुर्वन्ति। प्रहरणं सैनिकानाम् आभूषणम्। पुरा युद्धेषु गदायाः परशोः प्रासादीनां च प्रयोगः अभवत्। शस्त्रागारेषु आयुधानि स्थाप्यन्ते। स प्रतिदिनं जुहोति। अहं जुहोमि। त्वं जुहुधि। सः अजुहोत्। शिष्याः होष्यन्ति।

(क) संस्कृत बनाओ—

बहू का शरीर वस्त्र से शोभित हो रहा है। बह सास की सेवा करे। सेना में सैनिक होते हैं। योद्धा युद्धों में युद्ध करते हैं। योद्धा हथियार रखते हैं। शस्त्र योद्धाओं का आभूषण है। वे शत्रुओं पर तलवार, भाला, परशु से प्रहार करते हैं। शस्त्रागार में शस्त्र रखे जाते हैं। पहले युद्धों में गदा, परशु, भाले आदि का प्रयोग होता था। वह हवन करता है। मैं भी हवन करता हूँ। तू हवन कर। बालक हवन करेंगे। मैं काम करना चाहता हूँ (कृ), जल पीना चाहता हूँ और दान देना चाहता हूँ (दा)। तू पढ़ना चाहता है और लेख लिखना चाहता है। वह तैरना चाहता है। मैं कुछ कहना चाहता हूँ (ब्रू)।

(ख) संस्कृत में उत्तर दो—

वध्वाः तनूः कथं शोभते ? सा कां सेवेत ? योधानां किम् आभूषणम् ? शस्त्रागारेषु किं स्थाप्यते ? योधाः कुत्र युध्यन्ते ? पुरा युद्धेषु केषां शस्त्राणां प्रयोगः अभवत् ? योधाः किं धारयन्ति ?

(ग) रिक्त स्थानों को भरो—(सन् का प्रयोग)

रामः पुस्तकं······(पठ्)।

अहं कार्यं······(कृ)।

श्यामः नदीं······(तॄ)।

बालाः जलं······(पा)।

स धर्मं······(ज्ञा)।

स बालां······(दृश्)।

(घ) वधू शब्द के पूरे रूप लिखो।

(ङ) हु धातु के लट्, लोट्, लङ् के रूप लिखो।

(च) इन धातुओं के सन् प्रत्यय लगाकर रूप बनाओ—

पठ्, लिख्, कृ, तॄ, दृश्, ब्रू, लभ्, दा, जि, पा।

———

अभ्यास ३९

शब्दावली—मातृ = माता। धनुर्धरः = धनुषधारी, चापम् = धनुष, बाणः = बाण, तूणीरम् = तरकश, गुलिका = गोली, वर्मन् = कवच, भुशुण्डिः = बन्दूक, लघुभुशुण्डिः = पिस्तौल, शतघ्नी = तोप, आग्नेयास्त्रम् = बम, अग्निचूर्णम् = बारूद, परमाण्वस्त्रम् = एटम बम, धूमास्त्रम् = अश्रु (गैस), क्षिप् = फेंकना, भी = डरना।

सूचना—मातृशब्द (१६) और भी धातु (३४) के रूप स्मरण करो।

नियम ६६—(क्त प्रत्यय) भूतकाल अर्थ में धातु से क्त (त) प्रत्यय होता है। त प्रत्यय कर्मवाच्य और भाववाच्य में होता है। अतः कर्ता में तृतीया, कर्म में प्रथमा क्रिया के लिंग, वचन और विभक्ति कर्म के तुल्य होंगे। जैसे—रामेण पुस्तकं पठितम्, पुस्तकानि पठितानि, ग्रन्थः पठितः। तेन बालिका दृष्टा, फलं दृष्टम्, जनः दृष्टः। अकर्मक धातु से त प्रत्यय होगा तो कर्ता में तृतीया और क्रिया में नपुंसक लिंग एक-वचन। तेन हसितम्। तेन रुदितम्।

नियम ६७—(क्त प्रत्यय) जाना, चलना अर्थ की धातुओं और अकर्मक धातुओं से 'त' प्रत्यय होने पर कर्ता में प्रथमा और कर्म में द्वितीया होगी। स गृहं गतः। स आगतः। स सुप्तः। स मृतः।

नियम ६८ (क्त प्रत्यय)—'त' प्रत्यय से बने कुछ रूप ये हैं—पठितः, लिखितः, गम्–गतः, कृतः, दृश्–दृष्टः, ब्रू–उक्तः, नम्–नतः, जन्-जातः, धा-हितः, छिद्–छिन्नः, स्था–स्थितः, पा–पीतः।

उदाहरण वाक्य—वन्दे मातरम्। धनुर्धरः चापेन बाणं क्षिपति। सैनिकः लघुभुशुण्ड्या शत्रुषु गोलिकां क्षिपति। जनसंहाराय परमाण्वस्त्रम् आग्नेयास्त्रं च क्षिप्यते। बालकः चोरात् बिभेति। त्वं बिभेषि। त्वं न बिभीहि, सः अबिभेत्, बालः भेष्यति।

(क) संस्कृत बनाओ--

माता की वन्दना करता हूँ। योद्धा धनुष से बाण फेंकता है। तरकश में बाण हैं। सैनिक कवच पहनता है (वर्म धारयति)। युद्ध में बम, एटम बम और अश्रु गैस का प्रयोग होता है। योद्धा पिस्तौल से गोली चलाता है (क्षिप्)। तुम माता का कहना मानो (पालय)। माता की सेवा करो। माता जननी होती है। वह डरता है। मैं नहीं डरता। तुम न डरो। वह नहीं डरेगा। उसने पुस्तक पढ़ी। तूने फल देखा। मैंने जल पिया। उसने क्या कहा (उक्तम्)। राम वन गए। वह यहाँ आया। वह सोया। पशु मरा। वह हँसा। वह रोया। पुत्र उत्पन्न हुआ (जातः)। उसने लेख लिखा। तूने ग्रन्थ पढ़ा।

(ख) संस्कृत में उत्तर दो—

केन ग्रन्थः पठितः ? त्वया कति पुस्तकानि पठितानि ? तेन किं दृष्टम् ? तेन किं सत्यम् उक्तम् ? तेन किं पीतम् ? रामः कुत्र गतः ? तेन किं लिखितम् ? किं शिशुः सुप्तः ? योधः चापेन किं क्षिपति ? जन-संहाराय किं क्षिप्यते ? बालकः कस्मात् बिभेति ?

(क) वाक्य बनाओ—

पीतम्। दृष्टम्। जातः। लिखितः। पठितानि। कृतम्। सुप्तः। गतः।

(घ) मातृ शब्द के पूरे रूप लिखो।

(ङ) भी धातु के लट्, लोट्, लङ् के रूप लिखो।

(च) 'त' प्रत्यय लगाकर रूप बनाओ—

पठ्, लिख्, गम्, कृ, दृश्, पा, जन्, धा, स्था, ब्रू, हस्।

———

अभ्यास ४०

शब्दावली—वाच् = वाणी, त्वच् = त्वचा, ऋच् = वेद की ऋचा, शुच् = शोक। शिल्पम् = शिल्प, शिल्पिन् = शिल्पी, कारुः = शिल्पी, यान्त्रिकः = मिस्त्री, तक्षन् = बढ़ई, तन्तुवायः = जुलाहा, रजकः = धोबी, चर्मकारः = चमार, तन्तुः = धागा, पटः = वस्त्र, नापितः = नाई, क्षुरः = उस्तरा, कर्तनी = कैंची। कृन्तति = काटता है, वे (वयति) = बुनता है, रच् = बनाना, निर्मापय = बनाना।

नियम ६९—(क्तवतु प्रत्यय) भूतकाल में धातु से क्तवतु (तवत्) प्रत्यय होता है। यह कर्तृवाच्य में होता है, अतः कर्ता में प्रथमा, कर्म में द्वितीया, क्रिया कर्ता के अनुसार। 'त' प्रत्यय वाले रूपों में 'वत्' और जोड़ देने से तवत्-प्रत्ययान्त रूप बन जाते हैं। जैसे—कृत-कृतवत्, दृष्ट-दृष्टवत्, उक्त-उक्तवत्।

नियम ७०—(तवत् प्रत्यय) तवत्-प्रत्ययान्त के रूप पुंलिंग में भगवत् (७), स्त्रीलिंग में नदी (१३) और नपुंसकलिंग में जगत् (२१) के तुल्य चलेंगे। जैसे— स पुस्तकं पठितवान्। तौ पुस्तकं पठितवन्तौ। ते पुस्तकानि पठितवन्तः। सा पुस्तकं पठितवती। तत् फलं पतितवत्।

सूचना—वाच् शब्द (१७) और दा धातु (२५) के रूप स्मरण करो।

उदाहरण वाक्य—मधुरां वाचं वद। ऋचं पठ। शुचं त्यज। खगस्य त्वचं स्पृश। शिल्पं श्रीवृद्धेः साधनम् अस्ति। शिल्पिनः वस्तूनि रचयन्ति। तक्षा रथम्, तन्तुवायः पटम्, चर्मकारः पादत्राणम्, यान्त्रिकः यन्त्रं निर्मापयति। नापितः क्षुरेण केशान् कृन्तति। तन्तुवायः पटं वयति। बालकाय फलं देहि। स मह्यं फलानि अददात्। निर्धनाय धनं दद्यात्। क्षुधिताय भोजनं दद्यात्।

(क) संस्कृत बनाओ—

सदा मधुर वचन बोलो। वेद की ऋचाओं को पढ़ो। शोक न करो। कौवे की त्वचा काली (कृष्णा) होती है। शिल्प से श्रीवृद्धि होती है। शिल्पी नई वस्तुएँ बनाते हैं। बढ़ई मेज बनाता है। जुलाहा कपड़ा बुनता है। चमार जूता बनाता है। नाई उस्तरे से बाल काटता हैं। यान्त्रिक यन्त्र बनाता है। उसने गीता पढ़ी। उन्होंने वेद पढ़ा। उस बालिका ने पत्रिका पढ़ी। वह पत्ता गिरा। उसने सत्य कहा। मैंने घोड़ा देखा। उन्होंने लेख लिखा। वे कहाँ गये ? बच्चे को फल दो। निर्धन को धन दो उसने मुझे धन दिया। तुम मुझे क्या दोगे ? मैं तुझे पुरस्कार दूँगा। वह भूखे को भिक्षा दे।

(ख) संस्कृत में उत्तर दो—

नापितः क्षुरेण किं करोति ? शिल्पिनः किं रचयन्ति ? यान्त्रिकः किं रचयति ? तन्तुवायः किं वयति ? क्षुधिताय किं दद्यात् ? सा किं पठितवती ? स किं दृष्टवान् ? स किम् उक्तवान् ?

(ग) रिक्त स्थानों को भरो—(तवत् प्रत्यय)

सा सत्यम्‌……(ब्रू) ।
ते पुस्तकानि……(पठ्) ।
वयं ग्रन्थान्……(दृश्) ।
ते लेखान्……(लिख्) ।
वयं कार्यं……(कृ) ।
वृक्षात् पत्रं……(पत्) ।

(घ) वाच् शब्द के रूप लिखो।

(ङ) दा धातु के लट्, लोट्, लङ् के रूप लिखो।

(च) इन धातुओं के तवत् प्रत्यय के रूप बनाओ—

पठ्, गम्, लिख्, दृश्, पा, हस्, ब्रू, छिद्।

———

अभ्यास—४१

शब्दावली—सौचिकः=दर्जी, सूचिका=सूई, स्थपतिः=राज, मिस्त्री, अश्मचूर्णम्=सीमेंट, इष्टका=ईंट, चित्रकारः=पेण्टर, वर्तिका=ब्रश, कर्तरी=कैंची, शिल्पशाला=फैक्टरी। वारि=जल, शुचि=स्वच्छ, पवित्र, सुरभि=सुगन्धित, मनोहारिन्=मनोहर, सिव्=सीना, सीव्यति=सीता है, धा=रखना, नि+धा=रखना, वि+धा=करना।

नियम ७१—(शतृ प्रत्यय) 'रहा है' 'रहा था' आदि रहा' वाले प्रयोगों का अनुवाद शतृ (अत्) प्रत्यय लगाकर होता है। रूप बनाने का सरल उपाय यह है कि धातु के लट् प्र० पु० बहु० के रूप में से 'इ' और 'न्' हटा दें तो शतृ प्रत्यय वाला रूप बचता है। जैसे—पठ्-पठन्ति-पठत्। लिख्-लिखत्। कृ-कुर्वत्। गम्-गच्छत्। शब्दों के रूप पुंलिग में गच्छत् (८), स्त्रीलिंग में नदी (१३) और नपुं० में जगत् (२१) के तुल्य चलेंगे। जैसे—स गच्छन् आसीत्—वह जा रहा था। गच्छन्तं सिंहं पश्य। स क्रीडन् अस्ति।

सूचना—वारि शब्द (१९) और धा धातु (३६) के रूप स्मरण करो।

उदाहरण वाक्य-शुचि वारि पिब। सुरभि पुष्पं जिघ्र। मनोहारि दृश्यं पश्य। सौचिकः सूचिकया वस्त्रं सीव्यति। स्थपतिः इष्टकाभिः अश्मचूर्णेन च भवनं निर्मापयति। चित्रकारः वर्तिकया चित्रं करोति। शिल्पशालायां शिल्पिनः वस्तूनि निर्मापयन्ति। सा गच्छन्ती आसीत्। पठते बालकाय मोदकं यच्छ। धावतः अश्वात् नरः अपतत्। राजा रत्नं दधाति। फलके पुस्तकं विधेहि। त्वम् एतत् कार्यं विधेहि। त्वं किं विदधासि ? अहं टंकणक्रियां (टाइप) विदधामि।

(क) संस्कृत बनाओ--

वह स्वच्छ जल पीता है। मैं सुगन्धित फूल सूंघता हूँ। तुम मनोहर चित्र को देखो। दर्जी सूई से क्या सी रहा है ? वह कपड़ा सी रहा है। मिस्त्री ईंट और सीमेंट से मन्दिर बना रहा है। चित्रकार कूँची से बालिका का चित्र बना रहा है। फ़ैक्टरी में कारीगर नई वस्तुएँ बनाते हैं। तुम यह कार्य करो। इस पुस्तक को वहाँ रखो। मैं टाइप कर रहा हूँ। राजा मुकुट धारण करता है। वह घर जा रहा था। जाते हुए शेर को देखो। पढ़ते हुए बालक को फल दो। दौड़ते हुए घोड़े से वह बालक गिरा। तुम कहाँ जा रहे हो ? तुम क्या पढ़ रहे हो ? मैं मैदान में खेल रहा था।

(ख) संस्कृत में उत्तर दो—

कीदृशं वारि पिब ? सौचिकः किं सीव्यति ? चित्रकारः किं करोति ? शिल्पशालायां किं भवति ? त्वं किं विदधासि ? पुस्तकं कुत्र निधेहि ? पठते बालकाय किं ददासि ? धावतः अश्वात् कः अपतत् ?

(ग) रिक्त स्थानों को भरो—(शतृ प्रत्यय)

······बालकं पश्य (गम्)।
······बालकाय मोदकं यच्छ (पठ्)।
······अश्वात् नरः पतितः (धाव्)।
अहं······अस्मि (क्रीड्)।
स कार्यं······आसीत् (कृ)।
अहं चित्रं······अस्मि (दृश्)।

(घ) वारि शब्द के रूप लिखो।

(ङ) धा धातु के लट्, लोट्, लङ्, विधिलिङ् के रूप लिखो।

(च) शतृ प्रत्यय लगाकर रूप बनाओ—

पठ्, लिख्, गम्, कृ, दृश्, घ्रा, क्रीड्, धाव्।

———

अभ्यास ४२

शब्दावली—मधु=शहद, दारु=लकड़ी, अम्बु=जल, वस्तु=वस्तु, वसु=धन, अश्रु=आँसू, स्वादु=स्वादिष्ट, बहु=बहुत, शाकम्=साग, आलुः=आलू, रक्ताङ्गः=टमाटर, गोजिह्वा=गोभी, कलायः=मटर, भण्टाकी=बैंगन, मूलकम्=मूली, गृञ्जनम्=गाजर, अलाबुः=लौकी, युध्=लड़ना (आ०) बुध्=जानना (आ०), शुध्=शुद्ध होना (पर०), अप्=जल, गात्रम्=शरीर।

नियम ७२—(शानच् प्रत्यय) आत्मनेपदी धातुओं से 'रहा' अर्थ में लट् के स्थान पर शानच् (आन) प्रत्यय होता है। कहीं पर 'मान' हो जाता है। 'आन' प्रत्ययान्त के रूप पुंलिंग में रामवत्, स्त्रीलिंग में बालिकावत्, नपुं० में फलवत् चलेंगे। 'आन' से बने कुछ रूप ये हैं—वर्तते-वर्तमानः। सेवते-सेवमानः। वर्धते-वर्धमानः। यजते-यजमानः। मोदते-मोदमानः। सहते-सहमानः। एधते-एधमानः। स याचमानः अस्ति–वह माँग रहा है। स वर्धमानः अस्ति। सा वर्धमाना अस्ति।

सूचना—मधु शब्द (२०) और युध् धातु (४१) के रूप स्मरण करो।

उदाहरण वाक्य—मधु खाद। मधु आनय। दारु आनय। निर्मलम् अम्बु पिब। बालकस्य अश्रूणि पतन्ति। स वसूनि धारयति। इदं भोजनं बहु स्वादु वर्तते। अहम् अद्य भोजने आलोः रक्ताङ्गस्य गोजिह्वायाः च शाकम् अभक्षयम्। त्वं च कलायस्य भण्टाक्याः मूलकस्य गृञ्जनस्य अलाबोः च शाकम् अभक्षयः। योधाः युद्धेषु युध्यन्ते। बुधाः वेदार्थं बुध्यन्ते। बुद्धिः ज्ञानेन शुध्यति। मनः सत्येन शुध्यति। अद्भिः गात्राणि शुध्यन्ति।

(क) संस्कृत बनाओ—

शहद खाओ। शहद यहाँ लाओ। गंगा का जल पवित्र होता है। यहाँ कितनी वस्तुएँ हैं ? शिशु के आँसू गिर रहे हैं। यह आम बहुत स्वादिष्ट हैं। तुम्हें किसका साग अच्छा लगता है ? आलू का, गोभी का या मटर का ? लौकी, गाजर और मूली का साग खाओ। आलू-गोभी और आलू-मटर का साग उसे अच्छा लगता है। सैनिक युद्ध में लड़ते हैं। दुर्जन घर में ही लड़ पड़े। विद्वान् धर्म और अर्थ को जानते हैं। बुद्धि ज्ञान से शुद्ध होती है। जल से शरीर शुद्ध होता है। सत्य से मन शुद्ध होता है। वह माँग रहा है। वह बढ़ रहा है। वह दुःख सह रहा था।

(ख) संस्कृत में उत्तर दो—

गङ्गायाः अम्बु कीदृशम् अस्ति ? तत्र कति वस्तूनि सन्ति ? तुभ्यं कस्य शाकं रोचते ? त्वम् अद्य कस्य शाकम् अभक्षय ? बुद्धिः केन शुध्यति ? मनः केन शुध्यति ? गात्राणि कथं शुध्यन्ति ?

(ग) इन वाक्यों को शुद्ध करो—

बुधाः धर्मं बुध्यन्ति। मनः सत्येन शुध्यते। वीराः युद्धेषु युध्यन्ति। तत्र पञ्च वस्तु सन्ति। त्वां कस्य शाकं रोचन्ते ? दुर्जनाः गृहे एव युध्यन्ति। अयम् आम्रः बहु स्वादिष्टः अस्ति।

(घ) मधु शब्द के पूरे रूप लिखो।

(ङ) युध् धातु के लट्, लोट्, लङ् के रूप लिखो।

(च) इनके शानच् (आन)-प्रत्ययान्त रूप बनाओ—

मुद्, यज्, सह्, वृत्, वृध्, एध्, याच्।

———

अभ्यास ४३

शब्दावली—जगत् = संसार, वियत् = आकाश। महत् = महान्, पचत् = पकाता हुआ, पतत् = गिरता हुआ, शाकाहारिन् = शाकाहारी, मांसाहारिन् = मांसाहारी, भिण्डकः = भिंडी, जालिनी = तोरई, कूष्माण्डः = कद्दू, कर्कटी = ककड़ी, लवणम् = नमक, पलाण्डुः = प्याज, हरिद्रा = हल्दी, धान्यकम् = धनिया, उपस्करः = मसाला। जन् = पैदा होना।

नियम ७३—(तुमुन् प्रत्यय) को, के लिए, अर्थ को प्रकट करने के लिए धातु से तुमुन् (तुम्) प्रत्यय होता है। यह अव्यय होता है। इसके रूप नहीं चलते। धातु को गुण होता है। जैसे—पढ़ने को, खाने को आदि। पठ्-पठितुम्, लिख्-लेखितुम्, गम्-गन्तुम्, कृ-कर्तुम्, रुद्-रोदितुम्, पच्-पक्तुम्, हृ-हर्तुम्, धृ-धर्तुम्, स्ना-स्नातुम्, पा-पातुम्, ब्रू (वच्)-वक्तुम्, दृश्-द्रष्टुम्, वह्-वोढुम्, सह-सोढुम्, यज्-यष्टुम्, दा-दातुम्, नी-नेतुम्, प्रच्छ्-प्रष्टुम्। अहं पठितुं विद्यालयं गच्छामि। अहम् एतत् कार्यं कर्तुं शक्नोमि। जलं पातुम् इच्छामि।

सूचना—जगत् शब्द (२१) और जन् धातु (४२) के रूप स्मरण करो।

उदाहरण वाक्य—इदं जगत् सुन्दरम् अस्ति। वियति महान्तः पक्षिणः उड्डीयन्ते। पचन्तं पाचकं पतत् फलं च पश्य। शाकाहारिणः भिण्डकस्य, जालिन्याः, कूष्माण्डस्य च शाकं खादन्ति। मांसाहारिणः मांसं भक्षयन्ति। शाके हरिद्रा, धान्यकं पलाण्डुः उपस्करः लवणं च क्षिप्यन्ते। इदं जगत् जायते। तत्र शान्तिः जायताम्। बालः अजायत। शतेषु शूरः जायते। देशे वीराः बालकाः जनिष्यन्ते।

(क) संस्कृत बनाओ –

यह संसार सुन्दर और असुन्दर दोनों (द्वयम्) है। यह भवन महान् है। आकाश में पक्षी उड़ रहे हैं। गिरते हुए फल को देखो। रसोइया भोजन पका रहा है। शाकाहारी भिंडी, तोरई, कद्दू का साग खाते हैं। साग में नमक, मसाला, हल्दी, धनिया डाले जाते हैं। मांसाहारी मांस खाते हैं। मांसाहार स्वास्थ्य के लिए हानिकर है। यह संसार उत्पन्न होता है। देश में शान्ति हो। शिशु उत्पन्न हुआ। सैकड़ों में कोई एक वीर उत्पन्न होता है। तुम पढ़ने (के लिए) विद्यालय जाओ। मैं गुरु को देखना चाहता हूँ। मैं यह कार्य कर सकता हूँ। तुम जल पीने (के लिए) कुएँ के पास जाओ।

(ख) संस्कृत में उत्तर दो—

इदं जगत् कीदृशम् अस्ति ? वियति के उड्डीयन्ते ? किं पतत् अस्ति ? शाके किं किं क्षिप्यते ? मांसाहारः स्वास्थ्याय कीदृशः अस्ति ? त्वं किं कर्तुं शक्नोषि ? त्वं किं द्रष्टुम् इच्छसि ?

(ग) रिक्त स्थानों को भरो—

इदं जगत्……अस्ति।
अहं पितरं ……इच्छामि (दृश्)।
अहं कार्यं……शक्नोमि (कृ)।
अहं दुःखं… शक्नोमि (सह्)।
अहम् इमं भारं……शक्नोमि (वह्)।
अहं जलं……इच्छामि (पा)।

(घ) जगत् शब्द के पूरे रूप लिखो।

(ङ) जन् धातु के लट्, लोट्, लङ्, लृट् के रूप लिखो।

(च) इन धातुओं के तुमुन् (तुम्) प्रत्यय वाले रूप बनाओ—

पठ्, लिख्, गम्, पा, दा, स्ना, नी, प्रच्छ्, वह्, सह्, दृश्।

———

अभ्यास ४४

शब्दावली— नामन् = नाम, प्रेमन् = प्रेम, व्योमन् = आकाश, लोमन् = बाल, सामन् = सामवेद का मंत्र, शैलः = पहाड़, अद्रिः = पर्वत, शिला = चट्टान, निर्झरः = झरना, उत्सः = सोता, गुहा = गुफा, खनिः = खान, धातुः = धातु, हिमम् = बर्फ, अद्रिद्रोणी = घाटी, सु = रस निकालना, दु = दुःख देना, द्वयम् = दो, त्रयम् = तीन, चतुष्टयम् = चार, पञ्चकम् = पाँच, षट्कम् = छह, सप्तकम् = सात, दशकम् = दस।

नियम ७४—(क्त्वा प्रत्यय) 'कर' या 'करके' अर्थ में धातु से क्त्वा (त्वा) प्रत्यय होता है। यह अव्यय है, रूप नहीं चलते। जैसे—पढ़कर, लिखकर, जाकर आदि। पठ्-पठित्वा, लिख्-लिखित्वा, गम्-गत्वा, हन्-हत्वा, कृ-कृत्वा, हृ-हृत्वा, तॄ-तीर्त्वा, पॄ-पूर्त्वा, यज्-इष्ट्वा, ब्रू (वच्)-उक्त्वा, प्रच्छ्-पृष्ट्वा, वह्-ऊढ्वा, सह्-सोढ्वा, ग्रह् = गृहीत्वा, वस्-उषित्वा, दृश्-दृष्ट्वा, पा-पीत्वा, दा-दत्त्वा, पच्-पक्त्वा, हस्-हसित्वा, भक्ष्-भक्षयित्वा। पठित्वा, लिखित्वा, भुक्त्वा च विद्यालयं गच्छ।

सूचना—नामन् शब्द (२२) और सु धातु (४३) के रूप स्मरण करो।

उदाहरण वाक्य—प्रभोः नाम स्मर। बालेषु प्रेम कुर्याः। साम गाय। शैलेषु शिलाः, निर्झराः, उत्साः, गुहाः च भवन्ति। शैलेषु धातूनां खनिः, हिमस्य च समूहः प्राप्यते। अद्रिद्रोण्यां जनाः निवसन्ति। स सोमं सुनोति। दुर्जनः सज्जनं दुनोति। अत्र छात्रद्वयम्, पुस्तकत्रयम्, बालिकाचतुष्टयम्, फलषट्कम्, पुष्पदशकं च वर्तन्ते। त्वं भोजनं खादित्वा, जलं पीत्वा, स्वकार्यं च पूर्त्वा, विद्यालयं गच्छ।

(क) संस्कृत बनाओ—

अपना नाम अमर करो। प्रभु का नाम स्मरण करो। व्योम में पक्षी है। शिर पर बाल हैं। साम का गान करो। पहाड़ पर शिला, गुफा, झरने और सोते होते हैं। पहाड़ों पर बर्फ का ढेर और धातुओं की खानें भी होती हैं। घाटी में गाँव, नदी और जंगल होते हैं। सोम का रस निकालो। किसी को दुःख न दो (दु)। यहाँ पर तीन छात्र, चार छात्राएँ, सात पुस्तकें, आठ फल, नौ फूल और दस वृक्ष हैं। तुम पाठ पढ़कर, लेख लिखकर और खाना खाकर विद्यालय जाओ। गुरु से प्रश्न पूछकर यहाँ आवो। फल लेकर, पुस्तकें देकर और भार लेकर वहाँ जावो। यहाँ आकर काम करो।

(ख) संस्कृत में उत्तर दो—

कस्य नाम स्मर ? व्योम्नि के उड्डीयन्ते ? शैले किं किं भवति ? अद्रिद्रोण्यां के निवसन्ति ? पुस्तकपञ्चकं कुत्र वर्तते ? किं कृत्वा विद्यालयं गच्छ ? गुरुं किं पृष्ट्वा आगच्छसि ?

(ग) इन वाक्यों को शुद्ध करो—

स पुस्तकं ग्रीहीत्वा आगच्छति। गुरोः प्रश्नं पृष्ट्वा आगच्छ। त्वं जलं पात्वा आगच्छति। स नदीं तृत्वा इह आगतः। त्वं शत्रुं हनित्वा आगच्छसि। त्वं दुःखं सहित्वा विद्यां पठ।

(घ) नामन् और प्रेमन् शब्द के पूरे रूप लिखो।

(ङ) सु धातु के लट्, लङ् और विधिलिङ् के रूप लिखो।

(च) इन धातुओं के क्त्वा (त्वा) प्रत्यय लगाकर रूप बनाओ—

पठ्, लिख्, गम्, हन्, तॄ, पॄ, प्रच्छ्, दृश्, सह्, वह्, पच्।

———

अभ्यास—४५

शब्दावली—पयस् = जल, दूध; यशस् = यश, वचस् = वचन, शिरस् = शिर, सरस् = तालाब, तपस् = तपस्या, सदस् = सभा, नभस् = आकाश । वनम् = वन, लता = लता, वृक्षः = वृक्ष, मञ्जरी = बौर, पर्णम् = पत्ता, किसलयः = कोंपल, भद्रदारुः = चीड़, देवदारुः = देवदार, करीरः = बबूल । आप् = पाना, प्राप् = पाना, व्याप् = व्याप्त होना, समाप् = समाप्त करना ,अधि + इ = पढ़ना, अधीते = पढ़ता है ।

नियम ७५—(उपसर्ग) धातु से पहले लगने वाले प्र परा आदि को उपसर्ग कहते हैं। इनके लगने से धातु का अर्थ प्रायः बदल जाता है। कुछ उपसर्ग ये हैं - प्र, परा, अप, सम्, अनु, निर्, दुर्, वि, नि, उत्, उप ।

नियम ७६—(ल्यप् प्रत्यय) धातु से पहले कोई उपसर्ग होगा तो तो क्त्वा (त्वा) को ल्यप (य) हो जाता है। जैसे—आदाय (लेकर), आगत्य (आकर), प्रहृत्य (प्रहार करके), आनीय (लाकर), आहूय (बुलाकर), प्रारभ्य (प्रारम्भ करके)।

नियम ७७—(गुण, वृद्धि, संप्रसारण)—गुण कहने पर ये कार्य होते हैं—इ, ई को ए, उ, ऊ को ओ, ऋ, ॠ को अर्, ए को ऐ, ओ को औ। संप्रसारण में ये कार्य होते हैं—य् को इ, व् को उ, र् को ऋ।

सूचना—पयस् शब्द (२३) और आप् धातु (४४) के रूप स्मरण करो।

उदाहरण वाक्य—पयः पिब। यशः इच्छ। वचः ब्रूहि। सरसि कमलानि सन्ति। सदसि वद। वनेषु वृक्षाः लताः देवदारुः भद्रदारुः करीरः च भवन्ति। वृक्षेषु मञ्जर्यः, पर्णानि, किसलयानि च भवन्ति। त्वं रामम् आहूय, पुस्तकम् आदाय च अत्र आगच्छ। स धनं प्राप्नोत्। ईश्वरः जगत् व्याप्नोति। स कार्यं समाप्नोति।

(क) संस्कृत बनाओ—

जल पीओ। यश चाहो। सभा में वचन बोलो। शिर पर बाल हैं। तालाब में फूल हैं। आकाश में पक्षी हैं। वन में देवदार, चीड़ और बबूल के पेड़ हैं। लताओं पर पत्ते, कोंपल, बौर और फूल हैं। मैं पुरस्कार पाता हूँ। तूने धन पाया। ईश्वर सर्वत्र व्याप्त है। वह अपना काम समाप्त करता है। यहाँ आकर काम करो। राम को बुलाकर लाओ। कार्य प्रारम्भ करके न छोड़ो। मुझे फल लाकर दो। शत्रु प्रहार करके भागा (पलायितः)। गुरु को प्रणाम करके (प्रणम्य) यहाँ आवो। यह शास्त्र पढ़ कर (अधीत्य) विद्वान् हुआ। तुम उठ कर (उत्थाय) यहाँ आवो।

(ख) संस्कृत में उत्तर दो—

सदसि किं कुरु? किम् इच्छ? शिरसि के सन्ति? नभसि के उड्डीयन्ते? वनेषु किं भवति? वृक्षेषु किं भवति? कः जगत् व्याप्नोति? कः धनं प्राप्नोत्? किम् आदाय विद्यालयं गच्छ?

(ग) रिक्त स्थानों को भरो—

सदसि भद्रं वचः……(ब्रू)।
मह्यं जलम्…देहि (आनी)।
कार्यं…न त्यज (प्रारम्भ)।
शास्त्रम्…विद्वान् भव (अधी)।
गुरुं…अत्र आगच्छ (प्रणम्)।
पुस्तकम्…तत्र गच्छ (आदा)

(घ) पयस् और सरस् शब्द के रूप लिखो।

(ङ) आप् धातु के लट्, लोट्, लङ् के रूप लिखो।

(च) इन धातुओं के ल्यप् (य) प्रत्यय लगाकर रूप बनाओ—
आदा, आनी, आगम्, प्रह, प्रणम्, उत्था, अधि+इ, प्रारभ्।

———

अभ्यास ४६

शब्दावली—मनस् = मन, तमस् = अंधकार, तेजस् = तेज, ओजस् = तेज, ओज; वयस् = आयु, उरस् = छाती, छन्दस् = छन्द। आम्रः = आम, जम्बूः = जामुन, अश्वत्थः = पीपल, निम्बः = नीम, वटः = बड़, नारिकेलः = नारियल, बिल्वः = बेल, पलाशः = ढाक, पनसः = कटहल, शाल्मलिः = सेमर। शक् = सकना, चि = चुनना। पानकम् = शरबत।

नियम ७८—(तव्य प्रत्यय) धातु से 'चाहिए' अर्थ में तव्यत् (तव्य) प्रत्यय होता है। यह कर्मवाच्य और भाववाच्य में होता है। धातु को गुण होगा। क्त प्रत्यय के तुल्य तव्य में भी कर्ता में तृतीया, कर्म में प्रथमा, कर्म के अनुसार लिंग, विभक्ति, वचन होंगे। भाववाच्य में नपुं० एक० होगा। तव्य प्रत्यय के रूप, कृ—कर्तव्य। पठितव्य, लेखितव्य, नेतव्य, जेतव्य, द्रष्टव्य, प्रष्टव्य, गन्तव्य। मया पुस्तकं पठितव्यम्। मया बालिका द्रष्टव्या। मया ग्रन्थाः पठितव्याः।

नियम ७९—(अनीयर प्रत्यय) धातु से चाहिए अर्थ में अनीयर् (अनीय) प्रत्यय होता है। तव्य के तुल्य सब नियम लगेंगे। अनीय प्रत्यय के रूप—करणीय, पठनीय, लेखनीय, दर्शनीय, गमनीय, स्मरणीय, शोचनीय आदि। मया कार्यं करणीयम्।

सूचना—मनस् शब्द (२४) और शक् धातु (४५) के रूप स्मरण करो।

उदाहरण वाक्य—मनः शक्तेः स्रोतः अस्ति। तमसि न गच्छ। ओजः तेजः च धारय। किं ते वयः? मम उरसि पीडा वर्तते। वाटिकायाम् आम्राः अश्वत्थाः बिल्वाः पनसाः च भवन्ति। आम्रं जम्बूफलानि बिल्वं नारिकेलं च भक्षय। अहम् एतत् कार्यं कर्तुं शक्नोमि। त्वं फलानि चिनु। अहं कार्यं कर्तुम् अशक्नवम्।

(क) संस्कृत बनाओ—

आपका मन शुद्ध है। मन शक्ति का स्रोत है। अंधकार में न जाओ। तुम्हारी क्या आयु है? मेरी आयु बीस वर्ष है। छन्दों को स्मरण करो। मेरी छाती में दर्द है। उद्यान में आम, जामुन, नीम बड़, बेल और ढाक के वृक्ष हैं। तुम आम, जामुन और नारियल खाओ। बेल का शरबत लाभदायक होता है। तुझे पाठ पढ़ना चाहिए। तुझे लेख लिखना चाहिए। तुझे गाँव जाना चाहिए। मुझे लड़की देखनी चाहिए। तुझे पाठ याद करना चाहिए। वह यह काम कर सकता है। मैं लेख लिख सकता हूँ। मैं यह काम कर सका। तुम कल चुनो।

(ख) संस्कृत में उत्तर दो—

किं ते वयः? ते उरसि किं वर्तते? किं फलं भक्षय? उद्याने के वृक्षाः सन्ति? कानि फलानि तुभ्यं रोचन्ते? बिल्वस्य पानकं कीदृशम् अस्ति? त्वया किं कर्तव्यम्? त्वया किं पठनीयम्? मया का द्रष्टव्या?

(ग) इन वाक्यों को शुद्ध करो—

मया पाठं पठितव्यम्। त्वया कार्यः करणीयः। रामेण लङ्का जेतव्यः। त्वया बाला द्रष्टव्यः। मम वयः त्रिंशत् वर्षः अस्ति। मया कानि कर्माणि कर्तव्यम्। मया ग्रामं गन्तव्यम्। त्वं पाठं स्मर्तव्यम्।

(घ) मनस् और तमस् शब्दों के रूप लिखो।

(ङ) शक् धातु के लट्, लोट्, लङ् के रूप लिखो।

(च) इन धातुओं के तव्य और अनीय प्रत्यय लगाकर रूप बनाओ—

पठ्, लिख्, गम्, कृ, दृ, दृश्, हस्, पा।

अभ्यास ४७

शब्दावली—नगरम् = शहर, नगरी = कस्बा, कुटी = कुटिया, भवनम् = मकान, प्रासादः = महल, मार्गः = सड़क, राजमार्गः = मुख्य सड़क, उद्यानम् = बगीचा, पुरोद्यानम् = पार्क, वीथिका = गली, मृ = मरना, कर्तृ = करने वाला, हर्तृ = चुराने वाला, दातृ = देने वाला, अध्येतृ = पढ़ने वाला, करणम् = करना, पठनम् = पढ़ना, लेखनम् = लिखना, चिन्तनम् = सोचना।

नियम ८०—(तृच् प्रत्यय) धातु से 'वाला' (कर्ता) अर्थ में तृच् (तृ) प्रत्यय होता है। धातु को गुण होता हैं। पुंलिंग में कर्तृ और स्त्री-लिंग में नदी के तुल्य रूप चलेंगे। कुछ रूप ये हैं—कर्तृ-कर्त्री, दातृ, धातृ, पक्तृ, छेतृ, प्रष्टृ। ईश्वरः जगतः कर्ता, धर्ता, हर्ता च अस्ति। प्रकृतिः कर्त्री अस्ति। स दाता, द्रष्टा, पक्ता, छेत्ता, प्रष्टा च अस्ति।

नियम ८१—(ल्युट प्रत्यय) भाववाचक शब्द बनाने के लिए धातु से ल्युट् (अन) प्रत्यय होता है। धातु को गुण होगा। नपुं० में रूप चलते हैं। जैसे—पठ्-पठनम्, लेखनम्, गमनम्, भजनम्, गानम्, पानम्, स्थानम्। तस्य पठनं लेखनं गमनं गानं च सुन्दरम् अस्ति, सुन्दराणि सन्ति वा।

सूचना - मृ धातु (५१) के रूप स्मरण करो।

उदाहरण वाक्य—इदं नगरं सुन्दरम् अस्ति। अत्र प्रासादाः, भवनानि, उद्यानानि, पुरोद्यानानि, राजमार्गः, वीथिकाः च सन्ति। संसारे जनाः जायन्ते म्रियन्ते च। त्वं न बिभीहि, न मरिष्यसि। पशुः अम्रियत। रामस्य पठनं लेखनं गमनं गानं सर्वं सुन्दरम् अस्ति। पठने अनध्यायः न कर्तव्यः। ग्रन्थस्य कर्ता धर्ता दाता च अत्र सन्ति। धनस्य दातुः यशः भवति। धनस्य हर्तुः निन्दा भवति।

(क) संस्कृत बनाओ—

यह नगर सुन्दर है । इस नगर में मैं रहता हूँ । इस नगर में भवन, महल, बगीचे, पार्क, सड़कें और गलियाँ हैं । नगर का राजमार्ग स्वच्छ है । कस्बे में कुटियाँ, भवन, सड़क और उद्यान होते हैं । इस संसार में सारे प्राणी उत्पन्न होते हैं और मरते हैं । कौन नहीं मरता ? आत्मा नहीं मरता । पशु मरा । तुम मत डरो, नहीं मरोगे । इन छात्रों का पढ़ना, लिखना, गाना और जाना सुन्दर है । यह स्थान स्वच्छ है । धन का दाता नगर में रहता है । भोजन को पकाने वाला यहाँ आ रहा है । धन का हर्ता पापी है । संसार का कर्ता ईश्वर है । रानी धन की दात्री है । अध्येता ग्रन्थों को पढ़ता है ।

(ख) संस्कृत में उत्तर दो—

इदं नगरं कीदृशम् अस्ति ? अस्मिन् नगरे के निवसन्ति ? नगरे कानि वस्तूनि भवन्ति ? नगर्यां किं किं भवति ? के जायन्ते म्रियन्ते च ? धनस्य दातुः किं भवति ? कस्य निन्दा भवति ?

(ग) रिक्त स्थानों को भरो—

सर्वे लोकाः जायन्ते······च ।
ईश्वरः ·····कर्ता धर्ता च अस्ति ।
इदं नगरं · ···अस्ति ।
····· पुरोद्यानानि सन्ति ।
त्वं न······न मरिष्यसि ।
नगरे······भवन्ति ।

(घ) मृ धातु के लट्, लोट्, लङ्, लृट् के रूप लिखो ।

(ङ) इन धातुओं के तृच् (तृ) और ल्युट् (अन) लगाकर रूप बनाओ—

कृ, धृ, भृ, मृ, दा, धा, ज्ञा, पा ।

———

अभ्यास ४८

शब्दावली—नगरपालिका = म्युनिसिपलिटी, निगमः = कार्पोरेशन, द्वारम् = द्वार, कपाटम् = किवाड़, प्राङ्गणम् = आँगन, सोपानम् = सीढ़ी, चतुष्पथः = चौराहा, रक्षिस्थानम् = थाना, कोटपालः = कोतवाल, कोटपालिका = कोतवाली। मुच् = छोड़ना, सिच् = सींचना। स्म = भूतकालसूचक अव्यय।

नियम ८२—(क्तिन् प्रत्यय) धातुओं से क्तिन् (ति) प्रत्यय होता है। 'ति' प्रत्ययान्त शब्द स्त्रीलिंग होते हैं। मति शब्द (१२) के तुल्य रूप चलेंगे। ये भाववाचक संज्ञाशब्द होते हैं। कुछ रूप ये हैं—कृतिः (करना) गतिः (जाना), भू-भूतिः, स्था-स्थितिः, पा-पीतिः, गा-गीतिः स्तुतिः, भक्तिः। गम्-गतिः, मन्-मतिः, बुध्-बुद्धिः, वच्-उक्तिः, मुच्-मुक्तिः, शम्-शान्तिः।

नियम ८३—(घञ् प्रत्यय) धातु से भाववाचक संज्ञा शब्द बनाने के लिए घञ् (अ) प्रत्यय होता है। धातु को वृद्धि होती है। घञ् प्रत्ययान्त शब्द पुंलिग होते हैं। कुछ घञ्-प्रत्ययान्त शब्द ये हैं—पठ्-पाठः, लिख्-लेखः, हस्-हासः, कृ-कारः, हृ-हारः, पच्-पाकः, त्यज्-त्यागः, रुज्-रोगः, युज्-योगः, भुज्-भोगः, हन्-घातः। भोजनस्य पाकः। बालकस्य हासः।

सूचना—मुच् धातु (५२) के रूप स्मरण करो।

उदाहरण वाक्य—नगरेषु नगरपालिका भवति। महानगरेषु निगमाः भवन्ति। नगरेषु चतुष्पथाः, रक्षिस्थानानि, कोटपालाः, कोटपालिकाः च भवन्ति। भवनेषु द्वाराणि, कपाटानि प्राङ्गणानि, सोपानानि च भवन्ति। माता बालं न मुञ्चति। त्वं मुञ्च माम्। यतिः गृहम् अमुञ्चत्। बालिका वृक्षं सिञ्चति। त्वं वृक्षान् सिञ्च। रामस्य कृतिः शोभना अस्ति। त्वं बुद्धि शक्ति शान्ति मुक्ति च इच्छ। योगः मुक्त्यै, भुक्त्यै भवति। स पठति स्म, लिखति स्म च।

(क) संस्कृत बनाओ—

बड़े नगरों में निगम होते हैं। नगरों में नगरपालिकाएँ होती हैं। नगरों में चौराहे, थाने, कोतवाली होती हैं। कोतवाल नगर की रक्षा करता है। मकानों में द्वार, किवाड़, आँगन और सीढ़ी भी होती हैं। तुम कुपथ को छोड़ो। माता बच्चे को नहीं छोड़ती है। तुम वृक्षों को सींचो। बच्चे पेड़ों को सींच रहे हैं। वन में शेर रहता था। बच्चा पढ़ रहा था। इस कवि की कृति सुन्दर है। गज की गति सुन्दर है। तुम शक्ति, शान्ति और मुक्ति चाहो। रामायण का पाठ मुझे अच्छा लगता है। बुद्धि से काम करो। ईश्वर की भक्ति और स्तुति करो। आहार और विहार को नियमित करो।

(ख) संस्कृत में उत्तर दो –

नगरेषु किं किं भवति ? कोटपालः किं करोति ? चतुष्पथाः कुत्र भवन्ति ? माता कं न मुञ्चति ? यतिः किम् अमुञ्चत् ? कस्य कृतिः शोभना अस्ति ? त्वं किम् इच्छ ? कस्य ग्रन्थस्य पाठः तुभ्यं रोचते ?

(ग) इन वाक्यों को शुद्ध करो--

नगरे नगरपालिका भवन्ति। कोटपालः नगरस्य रक्षति। त्वां किं रोचते ? मां शान्तिः रोचते। त्वं गृहं मुञ्चतु। स नगरम् अमुञ्चन्। के वृक्षान् सिञ्चति ? माता पुत्रं न मुञ्चन्ति। त्वं शान्तिः इच्छ।

(घ) मुच् धातु के लट्, लोट्, लङ् के रूप लिखो।

(ङ) इन धातुओं के क्तिन् (ति) प्रत्यय लगाकर रूप बनाओ—

कृ, दृ, धृ, गम्, शम्, पच्, भज्, स्था, पा, गा, मन्, बुध्।

———

अभ्यास ४९

शब्दावली—गृहम् = घर, गवाक्षः = खिड़की, छदिः (स्त्री०) = छत, वरण्डः = बरामदा, कक्षः = कमरा, महाकक्षः = हाल, काचः = कांच, नालिः = नाली, शयनकक्षः = सोने का कमरा, उपवेशकक्षः = ड्राइंग-रूम, कुट्टिमम् = फर्श, खट्वा = खाट, पल्यङ्कः = पलंग, काष्ठासनम् = तख्त, भवनपृष्ठम् = ऊपर की छत, भित्तिः = दीवार, प्रलेपः = प्लास्टर। रुध् = रोकना, ढकना; छिद् = काटना ।

नियम ८४—(समास) दो या अधिक शब्दों को मिलाने को समास कहते हैं। समास करने पर समास हुए शब्दों के बीच की विभक्ति (कारक) नहीं रहती। समस्त पद एक हो जाता है और अन्त में विभक्ति लगती है। समास ६ हैं—१. अव्ययीभाव, २. तत्पुरुष, ३. कर्मधारय, ४. द्विगु, ५. बहुव्रीहि, ६. द्वन्द्व ।

नियम ८५—(अव्ययीभाव समास) अव्ययीभाव समास में किसी विशेष अर्थ में कोई अव्यय शब्द पहले रखा जाता है। समस्तपद अकारान्त होगा तो नपुं० एक० होगा। अन्य शब्द अव्यय होंगे। जैसे—प्रत्येक अर्थ में 'प्रति'-प्रतिगृहम्, प्रतिनगरम्। अनुसार अर्थ में 'यथा'-यथाशक्ति। साथ अर्थ में 'सह' को 'स'—सचक्रम्। अभाव अर्थ में निर्-निर्जनम्, निर्विघ्नम्। तक अर्थ में—'आङ्' आसमुद्रम्। समीप अर्थ में 'अनु'-अनुकूलम् ।

सूचना—रुध् धातु (५३) के रूप स्मरण करो।

उदाहरण वाक्य—मम गृहे गवाक्षः, छदिः, वरण्डः, कक्षत्रयम्, शयनकक्षः, उपवेशकक्षः च सन्ति। भित्तौ प्रलेपः अस्ति। भवनपृष्ठे कक्षद्वयं वर्तते। गवाक्षाः काचजटिताः सन्ति। कुट्टिमं दृढम् अस्ति। कक्षे खट्वा, पल्यङ्कः, काष्ठासनं च सन्ति। स मम मार्गं रुणद्धि। तक्षा काष्ठं छिनत्ति। त्वं काष्ठं छिन्धि। मेघः सूर्यम् अरुणत् ।

(क) संस्कृत बनाओ—

राम के घर में खिड़की, दरवाजा, छत, कमरे, बरामदा और आंगन हैं। दीवार पर प्लास्टर है। फर्श पक्का है। सोने के कमरे में खाट और पलंग हैं। ड्राइंगरूम में कुर्सी और तख्त हैं। छत पर दो कमरे हैं। खिड़कियों में कांच लगा है। छत का पानी नाली से नीचे जाता है। वह तेरा मार्ग रोकता है। तू मेरा मार्ग न रोक। बढ़ई लकड़ी काटता है। तू लकड़ी फाड़। बादल ने सूर्य को ढक दिया। यथाशक्ति काम करो। यह स्थान निर्जन है। समुद्र तक जाओ। चक्र सहित यहाँ आवो। प्रत्येक नगर में थाने हैं। भाग्य कभी अनुकूल होता है और कभी प्रतिकूल।

(ख) संस्कृत में उत्तर दो—

रामस्य गृहे कानि वस्तूनि सन्ति ? भित्तौ किम् अस्ति ? गवाक्षाः कीदृशाः सन्ति। मेघः कम् अरुणत् ? भवनपृष्ठस्य जलं कथं नीचैः गच्छति ? प्रतिनगरं किं भवति ? भाग्यं कीदृशं भवति ?

(ग) रिक्त स्थानों को भरो—

भित्तौ ····· अस्ति।
उपवेशकक्षे ····· सन्ति।
भवनपृष्ठे ····· वर्तते।
कुट्टिमं ······ अस्ति।
मेघः ······ अरुणत्।
तक्षा ······ छिनत्ति।

(घ) रुध् धातु के लट्, लोट्, लङ् के रूप लिखो।

(ङ) समास किसे कहते हैं ? समास होने पर क्या कार्य होते हैं ? समास कितने हैं ? उनके नाम लिखो।

———

अभ्यास ५०

शब्दावली--सुवर्णम् = सोना, रजतम् = चाँदी, ताम्रम = ताँबा, पित्तलम् = पीतल, लोहम् = लोहा, कांस्यम् = काँसा, शुद्धायसम् = स्टेनलेस स्टील, अभ्रकम् = अबरक, पारदः = पारा, सीसम् = सीसा, त्रपु (नपुं०) = रांगा, गन्धकः = गंधक। भुज् (आ०) = खाना।

नियम ८६—(तत्पुरुष समास) तत्पुरुष समास में दो या अधिक शब्दों का समास होता है। बीच में से द्वितीया आदि विभक्ति का लोप होता है। समस्त पद से विभक्ति होगी। जिस विभक्ति का लोप होगा, उसी विभक्ति के नाम से वह तत्पुरुष समास कहा जायगा। जैसे—द्वितीया तत्पुरुष, षष्ठी तत्पुरुष आदि। रामम् आश्रितः-रामाश्रितः। विद्यया हीनः-विद्याहीनः। ज्ञानेन शून्यः-ज्ञानशून्यः। गवे हितम्-गोहितम्। स्नानाय इदम्-स्नानार्थम्। रोगात् मुक्तः-रोगमुक्तः। विद्यायाः आलयः-विद्यालयः। राज्ञः पुरुषः-राजपुरुषः। शास्त्रे निपुणः-शास्त्रनिपुणः। कार्ये दक्षः-कार्यदक्षः। जले मग्नः-जलमग्नः।

सूचना—भुज् धातु (आ०, ५४) के रूप स्मरण करो।

उदाहरण वाक्य—सुवर्णस्य रजतस्य च आभूषणानि भवन्ति। सुवर्णं बहुमूल्यं वस्तु। ताम्रस्य पित्तलस्य लोहस्य कांस्यस्य शुद्धायसस्य च पात्राणि भवन्ति। धातुनिर्मितानि पात्राणि दृढानि भवन्ति। जनाः प्रायः धातुनिर्मितेषु पात्रेषु भोजनं कुर्वन्ति। अभ्रकं पारदः सीसं त्रपु च उपयोगिनः धातवः सन्ति। बालः भोजनं भुङ्क्ते। त्वं भोजनं भुङ्क्ष्व। ते फलानि अभुञ्जत। विद्याहीनः ज्ञानशून्यः वा पशुसमः। स्नानार्थं गच्छ। राजपुरुषः राजकार्यं करोति। शास्त्रनिपुणः शास्त्राणि अधीते।

(क) संस्कृत बनाओ —

सोने के आभूषण बनते हैं। सुनार चाँदी के भी अलंकार बनाता है। तांबा, पीतल, कांसा और स्टेनलेस स्टील के बर्तन बनते हैं। धातुनिर्मित पात्र मजबूत होते हैं। लोग प्रायः धातु-निर्मित पात्रों में खाना खाते हैं। अबरक, रांगा, सीसा और पारा उपयोगी धातुएँ हैं। राम खाना खाता है। तू फल खा। उसने पूआ खाया। तूने मिठाई खाई। वह खीर खाएगा। भोजन के लिए जाओ। विद्याहीन पशुतुल्य होता है। वह रोगमुक्त हुआ। राजपुरुष शासन करता है। शास्त्र-निपुण धर्मग्रन्थ पढ़ता है।

(ख) संस्कृत में उत्तर दो—

कः धर्मग्रन्थान् अधीते ? राजपुरुषः किं करोति ? विद्याहीनः कीदृशः भवति ? त्वं किम् अभुङ्क्थाः ? रामः किं भोक्ष्यते ? सः किं भुङ्क्ते ? कस्य आभूषणानि भवन्ति ? के उपयोगिनः धातवः सन्ति ? कीदृशानि पात्राणि दृढानि भवन्ति ?

(ग) इन वाक्यों को शुद्ध करो—

सुवर्णस्य आभूषणानि भवति। सुवर्ण बहुमूल्यः वस्तुः। लोहस्य पात्राणि दृढः भवति। विद्याहीनः पशुतुल्यम्। स फलं भुञ्जते। त्वं पूपम् अभुङ्क्त। स पायसं भोक्ष्यति। ते फलानि भुङ्क्ते। कः लवणान्नं भोक्ष्यति ? कानि उपयोगिनः धातवः सन्ति ?

(घ) भुज् धातु (आ०) के लट्, लोट्, लङ् और लृट् के रूप लिखो।

(ङ) इनके विग्रह (असमस्त रूप) बताओ—

स्नानार्थम्। ज्ञानशून्यः। जलमग्नः। राजपुरुषः। कार्य-निपुणः। रामाश्रितः। रोगमुक्तः। विद्यालयः।

अभ्यास ५१

शब्दावली—यत् = कि, अलम् = बस, समर्थ; इयत् = इतना कियत् = कितना, यावत् = जितना, तावत् = उतना, चेत् = तो, तर्हि = तो, नो चेत् = नहीं तो, नूनम् = अवश्य वरम् = अच्छा, आम् = हाँ, नहि = नहीं, अन्यत्र = और जगह, अन्यथा = नहीं तो वृथा = व्यर्थ, मुहुः = बारम्बार, भूयः = फिर, पुनः = फिर, वारंवारम् = बार-बार, एकत्र = एक जगह, सर्वत्र = सब जगह, सकृत् = एकबार, असकृत् = बारबार, मुहुः = बारबार, सहसा = एकदम, श्वः = आने वाला कल ह्यः = बीता हुआ कल। मल्लः = पहलवान। गृहाण = लो।

नियम ८७—(कर्मधारय समास) विशेषण और विशेष्य का जो समास होता है उसे कर्मधारय समास कहते हैं। विशेषण शब्द पहले रहेगा, विशेष्य बाद में। जैसे—नीलं कमलम् नीलकमलम्। महान् आत्मा-महात्मा। मुखम् एव कमलम्-मुखकमलम्। सुन्दर अर्थ में 'सु'। सुन्दरः पुरुषः-सुपुरुषः। तरह अर्थ में 'इव'। घनः इव श्यामः-घनश्यामः।

नियम ८८—(द्विगु समास) कर्मधारय समास में ही पहला शब्द संख्यावाचक होगा तो वह द्विगु समास होगा। सप्त ऋषयः-सप्तर्षयः। समूह अर्थ में—त्रयाणां लोकानां समाहारः-त्रिलोकम्, त्रिलोकी। इसी प्रकार चतुर्युगम्, चतुर्युगी, शताब्दी, त्रिभुवनम्।

सूचना—तन् धातु (५५) के रूप स्मरण करो।

उदाहरण वाक्य—अलं प्रयत्नेन। मल्लः मल्लाय अलम्। इयत् भोजनं भुङ्क्ष्व। कियत् धनम् इच्छसि ? यावत् इच्छसि तावत् भुङ्क्ष्व। पठ, नो चेत् गृहं गच्छ। किं तत्र गन्तुं शक्नोषि ? आम्, नहि। मुहुः, भूयो भूयः, वारं वारं वा पाठं पठ। सकृत् गृहं गच्छ, असकृत् पाठं स्मर। अहं ह्यः आगतः, श्वः गमिष्यामि। विद्या कीर्तिं वितनोति।

(क) संस्कृत बनाओ—

प्रयत्न मत करो। यह पहलवान उस पहलवान से लड़ सकता है। इतनी मिठाई खाओ। तुम कितना धन चाहते हो ? तुम जितना धन चाहते हो, उतना धन ले लो। पढ़ना चाहते हो तो पढ़ो, नहीं तो घर जाओ। तुम अवश्य सफल होगे। क्या तुम पढ़ना चाहते हो ? हाँ, नहीं। तुम अन्यत्र जाकर रहो। व्यर्थ विवाद न करो। पाठ बार-बार याद करो। तुम यहाँ एकबार आना, बारबार नहीं। आप बार-बार यहाँ दर्शन दें। सहसा कार्य न करो। वह कल यहाँ आया था, आज रहेगा (वस्, वत्स्यति), कल चला जाएगा। (गम्)। विद्या यश को फैलाती है। विद्या तुम्हारी कीर्ति फैलावे। नीलकमल शोभित हो रहा है।

(ख) संस्कृत में उत्तर दो –

मल्लः मल्लाय किम् अस्ति ? त्वं कियत् धनम् इच्छसि ? त्वं कियत् कार्यं कर्तुं शक्नोषि ? किं त्वं लेखितुं शक्नोषि ? वृथा किं न कुरु ? सः अत्र कदा आगतः, कदा च गमिष्यति ? विद्या किं वितनोति ? सहसा किं न विदधीत ?

(ग) रिक्त स्थानों को भरो –(अव्यय शब्द)

त्वं मह्यम्……धनं देहि।
पठसि…पठ,……गृहं गच्छ।
यत् दत्तं तत्……अस्ति।
भवान्……दर्शनं ददातु।
क्रियां……न विदधीत।
मल्लः मल्लाय……।

(घ) तन् धातु के लट्, लोट्, लङ् के रूप लिखो।

(ङ) इनके विग्रह वाक्य लिखो—

महात्मा, मुखकमलम्, सुपुरुषः, त्रिलोकम्, सप्तर्षयः घनश्यामः।

———

अभ्यास ५२

शब्दावली—मधुरम् = मीठा, प्रियम् = प्रिय, शोभनम् = ठीक, सुन्दरम् = सुन्दर समीचीनम् = अच्छा, पटुः = चतुर, गुरुः = भारी, कुशलः = चतुर, दक्षः = निपुण, त्वदीयः = तेरा, मदीयः = मेरा, भवदीयः = आपका, श्वेतः = सफेद, हरितः = हरा, नीलः = नीला, पीतः = पीला, कृष्णः = काला, रक्तः = लाल, उचितम् = उचित, ज्येष्ठः = सबसे बड़ा, कनिष्ठः = सबसे छोटा। क्री = खरीदना, वि + क्री = बेचना।

नियम ८९—(बहुव्रीहि समास) बहुव्रीहि समास में अन्य पद का अर्थ मुख्य होता है। समस्त पद विशेषण के रूप में आता है। इसमें शब्दार्थ करने पर जिसको, जिसने, जिसका, जिसमें आदि अर्थ निकलते हैं। दस हैं मुख जिसके वह, दश आननानि यस्य सः-दशाननः, दशमुखः (रावणः)। हतः शत्रुः येन सः–हतशत्रुः (राजा)। पीतम् अम्बरं यस्य सः-पीताम्बरः (कृष्ण)। सह (साथ) अर्थ में, पुत्रेण सहितः–सपुत्रः। इसी प्रकार सविनयम्, सादरम्, साग्रहम्। व्यधिकरण में (भिन्न विभक्ति होने पर)—धनुः पाणौ यस्य सः-धनुष्पाणि, जिसके हाथ में धनुष है।

सूचना—क्री धातु (५७) के रूप स्मरण करो।

उदाहरण वाक्य—मधुरं प्रियं शोभनं समीचीनं च वचनं वद। रामः शास्त्रेषु पटुः कुशलः निपुणः दक्षः च वर्तते। इदं पुष्पं सुन्दरम् अस्ति। स मदीयः त्वदीयः च सखा अस्ति। अहं भवदीयः शिष्यः अस्मि। रामः ज्येष्ठः, शत्रुघ्नः च कनिष्ठः भ्राता अस्ति। इदं वस्त्रं श्वेतं वर्तते। इमानि पुष्पाणि च हरितानि नीलानि पीतानि रक्तानि कृष्णानि च सन्ति। कृष्णा गौः अधिकं दुग्धं ददाति। ब्रूहि मम वचनम् उचितम् अनुचितं वा अस्ति ? वणिक् वस्तूनि क्रीणाति विक्रीणीते च। त्वं पुस्तकं क्रीणीथाः। स वस्त्रं क्रेष्यति।

(क) संस्कृत बनाओ—

मधुर वचन बोलो। मुझे प्रिय वचन अच्छा लगता है। आपका कथन ठीक है। सुन्दर वस्तु सबका मन हर लेती है। यह लोहा (अय) भारी है। राम कक्षा में निपुण और चतुर है। वह मेरा प्रिय मित्र है। वह मेरी प्रियतमा है। मैं आपका सेवक हूँ। तुम्हारा कौन मित्र है ? उचित और अनुचित को विचार कर (विचार्य) वचन कहो। सहसा काम न करो। वह मेरा बड़ा भाई है। श्याम मेरा सबसे छोटा भाई है। यह वस्त्र सफेद है। यह साड़ी काली है। ये फूल हरे, नीले, पीले, लाल, काले और सफेद हैं। वणिक् वस्तुएँ खरीदता है और बेचता है। क्या तुम वस्त्र खरीदोगे ?

(ख) संस्कृत में उत्तर दो—

कीदृशं वचनं वद ? रामः शास्त्रेषु कीदृशः अस्ति ? इमानि पुष्पाणि कीदृशानि सन्ति ? तव कः प्रियः ? रामस्य का प्रियतमा आसीत् ? पाण्डवेषु कः ज्येष्ठः आसीत्, कः च कनिष्ठः ? वणिक् किं करोति ?

(ग) इन वाक्यों को शुद्ध करो—

त्वं मधुरं वचनानि वद। सा मम प्रियतमः। सः तव प्रियतमा। इदं वस्त्रः श्वेतः वर्तते। इमानि पुष्पाणि पीतं वर्तते। वणिक् वस्तूनि विक्रीणाति। त्वं पुस्तकं क्रीणीयात्। कृष्णः गौः अधिकं दुग्धं ददति।

(घ) क्री धातु के लट्, लोट्, लङ् के रूप लिखो।

(ङ) इनके विग्रह वाक्य लिखो—

दशाननः, हतशत्रुः, सपुत्रः, सविनयम्, दशमुखः, पीताम्बरः, धनुष्पाणिः।

———

अभ्यास ५३

शब्दावली—वीणा = सितार, मुरली = बाँसुरी, सारङ्गी = सारंगी, वायोलिन, तानपूरः = तानपूरा, तन्त्रीकवाद्यम् = पियानो, मुरजः = तबला, ढोलकः = ढोलक, दुन्दुभिः = नगाड़ा, तूर्यम् = तुरही, शहनाई, संगीतम् = संगीत, गीतम् = गाना, गायकः = गाने वाला गायिका = गाने वाली गै (गाय) = गाना, वादय = बजाना, तारम् = तीव्र स्वर से, ग्रह = लेना, पकड़ना।

नियम ९० — (द्वन्द्व समास) दो या अधिक शब्दों का 'च' (और) अर्थ में समास होता है। विग्रह करने पर 'और' अर्थ निकलता है। इसे द्वन्द्व समास कहते हैं। दोनों पदों का अर्थ मुख्य होता है। संख्या के अनुसार अन्त में वचन होता है, दो हो तो द्विवचन, बहुत हों तो बहुवचन। जैसे—रामः च कृष्णः च-रामकृष्णौ। सीतारामौ, उमाशंकरौ, भीमार्जुनौ, रामलक्ष्मणौ। समाहार (समूह अर्थ) में नपुं० एक०। हस्तौ च पादौ च-हस्तपादम्। गोमहिषम्, व्रीहियवम्, शीतोष्णम्। एकशेष में द्विवचन या बहु० अर्थानुसार। माता च पिता च-पितरौ।

सूचना – ग्रह धातु (५८) के रूप स्मरण करो।

उदाहरण वाक्य नृत्यं गीतं वाद्यं च मिलित्वा संगीतं भवति। गायिकाः नृत्यन्ति गायन्ति च। वाद्यं लोकानां मनांसि हरति। संगीतं श्रुतिमधुरं भवति। संगीतं हृदये आनन्दं जनयति। बहूनि वाद्ययन्त्राणि सन्ति, यथा—वीणा, मुरली, सारङ्गी, तानपूरः, मुरजः, दुन्दुभिः तूर्यादिकं च। कस्मैचित् गायकाय वीणा रोचते, अन्यस्मै च तूर्यं तन्त्रीकवाद्यं वा। गायकः वीणां वादयति। स तारं गायति। अहं पुस्तकं गृह्णामि। त्वं शिशुं गृहाण। स दण्डम् अगृह्णात्।

(क) संस्कृत बनाओ—

संगीत सबका हृदय हर लेता है। नृत्य गीत और वाद्य मिलकर संगीत कहा जाता है। गायक गीत गाते हैं। नायिकाएँ नृत्य करती हैं। प्रत्येक वाद्य की पृथक् ध्वनि होती है। नृत्य उत्तम व्यायाम है। इससे प्रत्येक अंग में स्फूर्ति आती है। संगीत से कण्ठ में मधुरता आती है। वाद्य अनेक हैं। किसी गायक को सितार या बाँसुरी अच्छी लगती है, किसी को तानपूरा या वायोलिन। प्राचीन काल में ढोल और नगाड़े का प्रचलन था। गायक तानपूरा बजाता है। तुम गाओ और नाचो। मैं डंडा लेता हूँ। वह पुस्तक लेता है। माता ने बच्चे का हाथ पकड़ा। वह फूल लेगा। तुम क्या लोगे? मैं चाय लूँगा, वह दूध लेगा।

(ख) संस्कृत में उत्तर दो—

संगीतं केषां हृदयं हरति? संगीते किं किं समन्वितम् अस्ति? गायकाः किं कुर्वन्ति? गायिकाः किं कुर्वन्ति। नृत्यस्य कः लाभः अस्ति? कानि वाद्ययन्त्राणि सन्ति? त्वं किं वादयसि? त्वं किं ग्रहीष्यसि? माता कस्य हस्तं गृह्णाति?

(ग) रिक्त स्थानों को भरो—

मह्यं ...... रोचते।
तुभ्यं ...... वाद्यं रोचते।
नृत्यम् उत्तमः ...... अस्ति।
नृत्येन शरीरे ...... जायते।
त्वम् इदं पुस्तकं ......।

(घ) ग्रह धातु के लट्, लङ्, विधिलिङ्, लृट् के रूप लिखो।

(ङ) इनके विग्रह वाक्य लिखो—

रामकृष्णौ, भीमार्जुनौ, रामलक्ष्मणौ, पितरौ, हस्तपादम्।

———

अभ्यास ५४

शब्दावली—दर्पणः=शीशा, सिन्दूरम्=सिन्दूर, चूर्णकम्=पाउडर, बिन्दुः=बिन्दी, तिलकम्=तिलक, गन्धतैलम्=इत्र, शरः=क्रीम, प्रसाधनी=कंघी, दन्तधावनम्=दातून, दाँत का ब्रश; दन्तचूर्णम्=मंजन, टूथ पाउडर; दन्तपिष्टकम्=टूथ पेस्ट, प्रसाधनम्=सजाना। प्रसाधय=सजाना, योजय=लगाना, लिम्प्=लीपना, लगाना, शोधय=साफ करना।

नियम ९१—(नञ् समास) 'नहीं' अर्थ में नञ् समास होता है। बाद में व्यंजन होगा तो 'अ' शेष रहेगा, यदि स्वर होगा तो अन्' रहेगा। न ब्राह्मणः-अब्राह्मणः। इसी प्रकार अन्यायः, अप्रियः, असुन्दरः, अस्वस्थः। न उपस्थितः-अनुपस्थितः। इसी प्रकार अनुचितः, अनादरः, अनास्था, अनुदारः, अनादिः।

नियम ९२—(अलक् समास) कुछ स्थानों पर बीच की विभक्ति का लोप नहीं होता है, उसे अलुक् समास कहते हैं। जैसे—सरसिजम्, मनसिजः (कामदेव), युधिष्ठिरः, परस्मैपदम्, आत्मनेपदम्।

सूचना—ज्ञा धातु (५९) के रूप स्मरण करो।

उदाहरण वाक्य—सा दर्पणे मुखं पश्यति। युवतिः शिरसि सिन्दूरम्, भाले बिन्दुम्, कपोले चूर्णकं शरं च योजयति। सा शरीरे गन्धतैलम् अपि लिम्पति। बालिका प्रसाधन्या केशान् प्रसाधयति। त्वं दन्तधावनेन, दन्तचूर्णेन, दन्तपिष्टकेन वा दन्तान् शोधय। गुरुः शास्त्रं जानाति। अहं किमपि न जानामि। त्वं धर्मं जानीहि। स महता श्रमेण वेदम् अजानात्। त्वं शास्त्रं पठित्वा ज्ञास्यसि कः धर्मः, कः अधर्मः, किं पुण्यम्, किं पापम्?

(क) **संस्कृत बनाओ—**

रमा शीशे में मुँह देखती है। वह स्त्री शिर में सिन्दूर और माथे पर बिन्दी लगाती है। श्यामा गाल पर पाउडर और क्रीम लगाती है। उमा कंघी से बाल सँवारती है। हेमा देह पर इत्र लगाती है। वह दातून से दाँत साफ करता है। वह मंजन से या टूथपेस्ट से मुँह धोता है। तुम प्रतिदिन दाँत साफ करो। तुम क्या जानते हो? मैं कुछ नहीं जानता। तुम अपने कर्तव्य को जानो। उसने शास्त्रों को जाना। तुम विद्या पढ़कर जानोगे कि पाप और पुण्य क्या है? विद्वान् का अनादर अनुचित है। अन्याय को न सहो। अनुदार न हो। अप्रिय न बोलो।

(ख) **संस्कृत में उत्तर दो—**

रमा कस्मिन् मुखं पश्यति? युवतिः कपोले किं योजयति? केशान् कथं प्रसाधय? दन्तधावनेन किं कुरु? गुरुः किं जानाति? त्वं पठित्वा किं ज्ञास्यसि? किं न सहस्व?

(ग) **इनको यथास्थान भरो**—(विधेहि, सहस्व, ब्रूहि, जानीहि, लिम्पति, शोधय)

त्वं धर्मं……।
सा मुखे शरं……।
त्वं प्रतिदिनं दन्तान्……।
कदापि अन्यायं न……।
विदुषः अनादरं न……।
अप्रियम् असत्यं च न……।

(घ) ज्ञा धातु के लट्, लोट्, लङ् के रूप लिखो।

(ङ) **इनके विग्रह वाक्य लिखो—**

अब्राह्मणः, अनुचितः, अनुपस्थितः, अप्रियम्, अनास्था।

अभ्यास ५५

शब्दावली—रत्नम्=रत्न, मणिः=रत्न, मुक्ता=मोती, मौक्तिकम्=मोती, इन्द्रनीलः=नीलम, हीरकः=हीरा, प्रवालम्=मूंगा, पुष्परागः=पुखराज, मरकतम्=पन्ना, वैदूर्यम्=लहसुनिया, काञ्चनम्=सोना, धारय=पहनना, भूषय=सजाना ।

नियम ९३—(अपत्यार्थक प्रत्यय) पुत्र अर्थ में शब्द से अण् (अ) प्रत्यय होता है । प्रथम स्वर को वृद्धि होती है । जैसे—वसुदेव का पुत्र-वासुदेवः । पुत्र का पुत्र-पौत्रः । कुरु>कौरवः । पाण्डु>पाण्डवः । पृथा>पार्थः ।

नियम ९४—(अपत्यार्थक) कुछ शब्दों से पुत्र अर्थ में इञ् (इ) प्रत्यय होता है । प्रथम स्वर को वृद्धि । दशरथ का पुत्र–दाशरथिः । सुमित्रा>सौमित्रिः (लक्ष्मण) । द्रोण<द्रौणिः (अश्वत्थामा) ।

नियम ९५—(अपत्यार्थक) कुछ शब्दों से पुत्र अर्थ में 'य' प्रत्यय लगता है । प्रथम स्वर को वृद्धि । दिति के पुत्र-दैत्याः । अदिति>आदित्यः । गर्ग>गार्ग्यः । स्त्रीलिंग शब्दों से पुत्र अर्थ में 'एय' लगता है । कुन्ती के पुत्र–कौन्तेयाः । द्रौपदी>द्रौपदेयः, राधा>राधेयः (कर्ण) ।

उदाहरण वाक्य—रत्नानि धारय । रत्नानि बहुमूल्यानि भवन्ति । रत्नानि शरीरं भूषयन्ति । समुद्रे मणयः भवन्ति । मौक्तिकं हीरकं प्रवालं पुष्परागं वैदूर्यम् इन्द्रनीलं च धनिनः धारयन्ति । रत्नजटितानि आभरणानि शोभन्ते । वासुदेवाय नमः । दाशरथिं भज । कौरवाः पाण्डवाः च अयुध्यन्त । श्रीकृष्णः पार्थाय गीताम् उपादिशत् । दितेः पुत्राः दैत्याः सन्ति अदितेः च आदित्याः । सौमित्रिः दाशरथिना सह वनम् अगच्छत् । राधेयः कर्णः महादानी महाशूरः च आसीत् ।

(क) संस्कृत बनाओ—

सभी रत्न बहुमूल्य होते हैं। रत्नों को धारण करो। रत्नों से शरीर की शोभा बढ़ती है। कुछ रत्न शरीर के लिए लाभकर हैं। समुद्र में रत्न होते हैं। विद्या सर्वोत्तम रत्न है। धनी लोग मोती, नीलम, हीरा, मूंगा, पुखराज और पन्ना पहनते हैं। रत्नजटित आभूषण शरीर की शोभा बढ़ाते हैं (वर्धयन्ति)। श्रीकृष्ण ने पृथा के पुत्र अर्जुन को गीता का उपदेश दिया। श्रीकृष्ण वसुदेव के पुत्र थे। वासुदेव को नमस्कार। दशरथ के पुत्र राम सुमित्रा के पुत्र लक्ष्मण के साथ वन गए। कौरव और पाण्डवों का युद्ध हुआ। दिति के पुत्रों को दैत्य कहते हैं और अदिति के पुत्रों को आदित्य।

(ख) संस्कृत में उत्तर दो—

रत्नानां के लाभाः सन्ति ? रत्नानि किं भूषयन्ति ? के रत्नानि धारयन्ति ? वसुदेवस्य पुत्रः कः अस्ति ? दाशरथिना सह कः वनम् अगच्छत् ? दितेः पुत्राः के सन्ति ? राधेयः कीदृशः आसीत् ? के अयुध्यन्त ? आदित्याः कस्याः पुत्राः सन्ति ? कर्णः कस्याः पुत्रः ?

(ग) इन वाक्यों को शुद्ध करो—

रत्नानि बहुमूल्यं भवन्ति। मणयः शरीरं भूषयति। रत्नानि शरीरस्य कृते लाभकराः सन्ति। वासुदेवं नमः। रत्नानि शरीरं भूषयति। कौरवाः पाण्डवाः च अयुध्यत। स गीतायाः उपदिशति।

(घ) इनके अपत्यार्थक शब्द बनाओ —

दशरथ, वसुदेव, कुरु, पाण्डु, सुमित्रा, दिति, अदिति, पृथा, कुन्ती, राधा, द्रोण, पुत्र।

अभ्यास ५६

शब्दावली—ज्वरः=ज्वर, कासः=खांसी, विषमज्वरः=मलेरिया, शीतज्वरः=इंफ्लूएन्जा, फ्लू; संनिपातज्वरः=टाइफाइड, राजयक्ष्मन्=तपेदिक, अतिसारः=दस्त, प्रवाहिका=पेचिश, वमथुः (वमनम्)=कै (उल्टी), प्रतिश्यायः=जुकाम, विषूचिका=हैजा, मधुमेहः=डाएबिटीज, पाण्डुः=पीलिया, पक्षाघातः=लकवा, रक्तचापः=ब्लडप्रेसर, अजीर्णम्=अपच, बद्धकोष्ठः=कब्ज।

नियम ९६—(मतुप् प्रत्यय) युक्त या 'वाला' अर्थ में मतुप् (मत्) प्रत्यय होता है। शब्द के अन्त में अ या आ होगा तो मत् को वत् हो जाएगा। धन वाला-धनवत्-धनवान्। इसी प्रकार ज्ञानवान्, विद्यावान्, गुणवान्। श्रीमान्, धीमान्, बुद्धिमान्। स्त्रीलिंग में-श्रीमती, बुद्धिमती, गुणवती।

नियम ९७—(इन् और इक प्रत्यय) 'वाला' अर्थ में ही इन् और इक प्रत्यय भी होते हैं। धन वाला-धनिन्, धनिकः। इसी प्रकार दण्ड-दण्डिन्, गुण-गुणिन्, ज्ञान-ज्ञानिन्। माया-मायिकः।

नियम ९८—(इत प्रत्यय) कुछ शब्दों से युक्त अर्थ में इतच् (इत) प्रत्यय होता है। तारों से युक्त, तारका-तारकितः। पुष्प-पुष्पितः, दुःख-दुःखितः, क्षुधा-क्षुधितः, तृषा-तृषितः, अङ्कुर-अङकुरितः।

उदाहरण वाक्य—रोगाः दुःखदाः। ज्वरेण नरः म्रियते। रोगाः शरीरस्य स्वास्थ्यं नाशयन्ति। विषमज्वरः शीतज्वरः संनिपातज्वरः च भयंकराः प्राणनाशकाः ज्वराः सन्ति। राजयक्ष्मा शरीरं शोषयति। अजीर्णं सर्वेषां रोगाणां मूलम्। विषूचिका, मधुमेहः, पक्षाघातः च प्राणान् हरन्ति। आरोग्यं महत् धनम् अस्ति। नीरोगः स्वस्थः सबलः च भव। रुग्णाय औषधम्, क्षुधिताय भोजनम, तृषिताय च जल देहि। मूत्रस्य पुरीषस्य च वेगं न धारयेत्। सदा पथ्यं भुञ्जीत।

(क) संस्कृत बनाओ—

शरीर रोगों का घर है। रोग दुःख देते हैं। रोगनिवारणार्थं ओषधि का सेवन करो। ज्वर शरीर के ताप को बढ़ाता है। मलेरिया, फ्लू, टाइफाइड प्राणघातक रोग हैं। हैजा, तपेदिक, पीलिया और लकवा मृत्यु के कारण हैं। कब्ज सब रोगों का मुख्य कारण है। आहार और विहार के असंयम से रोग होते हैं। मूत्र और शौच के वेग को न रोको। इनके रोकने से (रोधनेन) बहुत से रोग होते हैं। आरोग्य के लिए प्रतिदिन भ्रमण व्यायाम और योगासन बहुत उपयोगी हैं। प्रतिदिन कुछ आसन करो। सदा पथ्य खावे। अपथ्य के भक्षण से रोग होते हैं।

(ख) संस्कृत में उत्तर दो—

रोगा कीदृशाः सन्ति ? सर्वेषां रोगाणां किं मूलम् ? मधुमेहः किं करोति ? कस्य वेगं न धारयेत् ? किं महत् धनम् अस्ति ? रुग्णाय किं दद्यात् ? क्षुधिताय किं देहि ? तृषिताय किं देहि ?

(ग) रिक्त स्थानों को भरो—

आरोग्यं महत्……अस्ति।
मूत्र वेगं न……।
सदा पथ्यं……।
रुग्णाय …देहि।
ज्वरेण नरा……।
रोगाः स्वास्थ्यं……।

(घ) इन शब्दों से 'युक्त' अर्थ वाले शब्द बनाओ—

धन, गुण, बुद्धि, धी, श्री, विद्या, दण्ड, माया, क्षुधा, तृषा, अङ्कुर, पुष्प, दुःख, तारका, ज्ञान, बल।

अभ्यास ५७

शब्दावली—जलपानम् = जलपान, चायम् = चाय, चायपात्रम् = टी-पाट, कफघ्नी = काफी, कन्दुः = केतली, अभ्यूषः = डबल रोटी, भृष्टापूपः = टोस्ट, पिष्टान्नम् = पेस्ट्री, पिष्टकः = बिस्किट, गुल्यः = टाफी, लवणान्नम् = नमकीन, समोषः = समोसा, पक्ववटिका = पकौड़ी, दधिवटकः = दहीबड़ा, पक्वालुः = आलू की टिकिया, पुलाकः = पुलाव।

